MSS No. 317 Subject PHILOSOPHY

Name of MSS तत्व कौमुदी

Author वाचस्पति मिश्र

Period Folios 63

Script SANSKRIT Source Prithi pal Singh

Missing Folios 1-5

क्षयफलोऽसकृदपुनरावृत्तिश्रुतेः न च कार्य्यत्वेनानित्यता फलस्य युक्ता॥ भावरू
पस्य कार्य्यस्य तथाभावात्॥ दुःखप्रध्वंसस्य तु कार्य्यस्यापि तद्विपरीतत्वात्॥ न च दुःखां
तरोत्पादः कारणाप्रवृत्तेः कार्य्यानुत्पादात्॥ विवेकज्ञानोपजननपर्य्यंतत्वाच्च
कारणप्रवृत्तेः॥ एतच्चोपरिष्टादुपपादयिष्यते चोत्तरार्धस्य॥ तस्मादानुश्रविका
द्दुःखापघातकाद्धेतोर्विपरीतः सत्त्वपुरुषान्यताप्रत्ययसाक्षात्कारो दुःखापघा
तको हेतुरत एव श्रेयान्॥ आनुश्रविको हि वेदविहितत्वान्मात्रया दुःखापघात
कत्वाच्च प्रशस्यः सत्त्वपुरुषान्यताप्रत्ययोपि प्रशस्यः॥ तदनयोः प्रशस्ययोर्मध्ये
सत्त्वपुरुषान्यताप्रत्ययः श्रेयान् कुतः पुनरस्योत्पत्तिरित्यत उक्तं व्यक्ताव्यक्तज्ञ
विज्ञानादिति॥ व्यक्तं चाव्यक्तं च ज्ञश्च व्यक्ताव्यक्तज्ञाः तेषां विज्ञानं विवेकज्ञानं

ांख्य· व्यक्तज्ञानपूर्वकमव्यक्तस्य तत्कारणस्य ज्ञानं तयोः पारार्थ्येनात्मा परो ज्ञायत
इति ज्ञानक्रमेणाभिधानं ॥ एतदुक्तं भवति ॥ श्रुतिस्मृतीतिहासपुराणेभ्यो व्यक्ता
६ 6 दीन् विवेकेन श्रुत्वा शास्त्रयुक्त्या च व्यवस्थाप्य दीर्घकालादरनैरंतर्यसत्कार
संविताद्भावनामयाद्विज्ञानादिति ॥ यथा वक्ष्यति ॥ एवं तत्त्वाभ्यासान्नास्मि न मे
नाहमित्यपरिशेषं अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानमिति ॥ २ ॥ तदेवं प्रे
क्षावदपेक्षितार्थत्वेन शास्त्रारंभं समाधाय शास्त्रमारभमाणः श्रोतृबुद्धिसमा
धानाय तदर्थं संक्षेपतः प्रतिजानीते ॥ मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृति
विकृतयः सप्त ॥ षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥ संक्षेपतो
हि शास्त्रार्थमस्य चतस्रो विधाः कश्चिदर्थः प्रकृतिरेव कश्चिद्विकृतिरेव कश्चित्

कृतिर्विकृतिः॥ कश्चिदुभयरूपः॥ तत्र का प्रकृतिरित्यत उक्तं मूलप्रकृतिर
विकृतिः॥ तत्र प्रकरोतीति प्रकृतिः प्रधानं॥ सत्वरजतमसां साम्यावस्था सा अ
विकृतिः प्रकृतिरेवेत्यर्थः कस्मादित्यत उक्तं मूलेति॥ मूलं चासौ प्रकृतिश्चेति
मूलप्रकृतिः विश्वस्य कार्यकलापस्य सा मूलं न त्वस्या मूलांतरमस्ति॥ अन
वस्थाप्रसंगात्॥ न चानवस्थायामस्ति प्रमाणमिति भावः॥ कतमाः पुनः प्रकृ
तिविकृतयः कियत्यश्चेत्यत उक्तं महदाद्याः प्रकृतिविकृतयः सप्त॥ प्रकृतय
श्च ता विकृतयश्चेति प्रकृतिविकृतयः सप्त॥ तथा हि॥ महत्तत्वमहंकारस्य प्र
कृतिर्विकृतिश्च मूलप्रकृतेः॥ एवमहंकारतत्वं तन्मात्राणामिंद्रियाणां च प्रकृ
तिर्विकृतिश्च महतः एवं पंचतन्मात्राणि तत्वानि भूतानामाकाशादीनां प्रकृत

योविकृतनयस्याहंकारसंज्ञस्यकाविकृतिरेवकियतीचेत्यतउक्तंषोडशकस्तु

विकारइतिषोडशसंख्यापरिमितोगणः षोडशकः तुशब्दोऽवधारणेभिन्नक्र

मः ॥ पंचभूतानिएकादशेंद्रियाणिइतिषोडशकोगणोविकारएवनप्रकृतिः।

यद्यपिपृथिव्यादीनामपिगोघटवृक्षादयोविकाराः एवंतद्विकारभेदानांप

योवीजादीनांदध्यंकुरादयः तथापिगवादयोवीजादयोवानपृथिव्यादिभ्य

स्तत्वांतरं तत्वांतरोपादानत्वंचप्रकृतित्वमिहाभिप्रेतमितिनदोषः सर्वेषांगो

घटादीनांस्थूलेंद्रियग्राह्यतयाचसमत्विनतत्वांतरत्वं॥ स्वरूपमाह॥ नप्रकृ

तिर्नविकृतिः पुरुषइति॥ एतत्सर्वमुपपादयिष्यते॥३॥ तमिममर्थंप्रामाणिकं

कर्तुमभिमताः प्रमाणभेदाः लक्षणीयाः नचसामान्यलक्षणमंतरेणविशे

बलक्षणं कर्तुमिति प्रमाणसामान्यं तावल्लक्षयति ॥ दृष्टमनुमानमाप्तवचनं
च सर्वप्रमाणसिद्धत्वात् ॥ त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि ॥ अत्र
= व्युत्पत्तिः
च प्रमाणमिति समाख्या लक्षणपदं ॥ तन्निर्वचनं च लक्षणं ॥ प्रमीयतेऽनेनेति नि
र्वचनात्प्रमां प्रति कारणत्वं गम्यते ॥ असंदिग्धाविपरीतानधिगतविषया चित्त
वृत्तिर्बोधश्च पौरुषेयः फलं प्रमा॰ तत्साधनं प्रमाणमिति संशयविपर्ययस्मृ
नातिव्याप्तिः =
तिसाधनेष्वप्रसंगः ॥ संख्याविप्रतिपत्तिं निराकरोति ॥ त्रिविधमिति ॥ तिस्रो वि
धा यस्य प्रमाणसामान्यस्येति त्रिविधं न न्यूनं नाप्यधिकमित्यर्थः ॥ विशेषलक्षणा
= तिस्रो विधा
नंतरं चैतदुपपादयिष्यामः ॥ कतमास्ता विधा इत्यत आह दृष्टमिति ॥ एतच्च लौ
किकप्रमाणाभिप्रायमिति लोकव्युत्पादनार्थत्वाच्छास्त्रस्य तस्यैव चाधिकारात् त्रा १
लौकिकप्रमाणस्याः अशास्त्री

२ तत्सं १ ऊर्ध्वस्रोतसां

आर्षं तु विज्ञानं योगिनां न लोकव्युत्पादनायालमिति । सदपि नाभिहितं । अनधि-
कारात् ॥ स्यादेतत् ॥ मा भून्न्यूनमधिकं तु कस्मान्न भवति । संगिरन्ते हि वादिनः उप-
मानादीन्यपि प्रमाणानीत्यत आह । सर्वप्रमाणसिद्धत्वात् ॥ एष्वेव दृष्टानुमानाप्त-
४ वचनेषु सर्वेषां प्रमाणानां सिद्धत्वात् अंतर्भावादित्यर्थः ॥ एतच्चोपपादयिष्यत
इत्युक्तं ॥ अथ प्रमेयव्युत्पादनाय प्रवृत्तं शास्त्रं कस्मात्सामान्यतो विशेषतश्च
प्रमाणं लक्षयतीत्यत आह प्रमेयसिद्धिः प्रमाणाद्धीति ॥ सिद्धिः प्रतीतिः सेयमार्था-
र्थक्रमानुरोधेन पाठक्रममनादृत्य व्याख्याता ॥ संप्रति विशेषलक्षणावसरे प्रत्य-
क्षस्य सर्वप्रमाणतोऽभ्यर्हितत्वात्सर्ववादिनामविप्रतिपन्नत्वाच्च तदेव तावल्लक्षय-
ति ॥ ४ ॥ प्रतिविषयाध्यवसायो दृष्टं त्रिविधमनुमानमाख्यातं ॥ तल्लिंगलिंगिपूर्वकमा

तदधीनत्वाच्चानुमानादीनां २

पूर्वं २

नस्कृतिरात्र वचनं तु ॥ अत्रेदं दृष्टमिति लक्ष्यनिर्देशः परिशिष्टं तु लक्षणं समानाऽस
मानजातीयव्यवच्छेदो लक्षणार्थः ॥ अवयवार्थस्तु विषिण्वंति विषयिणमवबध्नं
ति स्वेन रूपेण निरूपणीयं कुर्वंतीति यावत् ॥ विषयाः पृथिव्यादयः सुखादय
श्चास्मदादीनां अविशेषाश्च तन्मात्रलक्षणा योगिनामूर्ध्वरेतसां च विषयाः वि
षयं विषयं प्रतिवर्त्तत इति प्रतिविषयं इंद्रियं ॥ वृत्तिश्च संनिकर्षः ॥ अर्थसंनिकृ
ष्टमित्यर्थः ॥ तस्मिन्नध्यवसायस्तदाश्रित इत्यर्थः ॥ अध्यवसायश्च बुद्धिव्या
पारो ज्ञानं ॥ उपात्तविषयाणामिंद्रियाणां वृत्तौ सत्यां बुद्धेस्तमोभिभवे सति यः
सत्वसमुद्रेकः सोऽध्यवसाय इति ॥ वृत्तिरिति च ज्ञानमिति कथ्यते ॥ इदं तत्प्रमाणं २२
॥ अनेन यश्चेतनाशक्तेरनुग्रहस्तत्फलं प्रमा बोधः ॥ बुद्धितत्त्वं हि प्राकृतत्वादचे

अप्यचेतनोपि ४ तेनैतत्प्रमाणेन १

त्वको० तनमितिनिदीयोऽध्यवसायोऽप्यचेतनः घटादिवत् ॥ एवं बुद्धितत्त्वस्य सुखादयोपि
परिणामभेदाः अचेतनाः पुरुषस्तु सुखाद्यननुषंगी चेतनः ॥ सोयं बुद्धितत्त्ववर्त्तिना
९ ज्ञानसुखादिना तत्प्रतिबिंबितस्तच्छायापत्त्या ज्ञानसुखादिमानिव भवतीति चेतनानु
१ गृह्यते चितिच्छायापत्त्या चाचेतनापि बुद्धिस्तदध्यवसायश्चेतन इव भवतीति यथा वक्
ष्यति ॥ तस्मात्तत्संयोगादचेतनं चेतनावदिव लिंगं ॥ गुणकर्त्तृत्वेपि तथा कर्त्तेव भवत्यु
दासीनः ॥ तत्राध्यवसायग्रहणेन संशयं व्यवच्छिनत्ति ॥ संशयस्यानवस्थितग्रहणे
नानिश्चितरूपत्वात् निश्चयोऽध्यवसाय इति चानर्थांतरं ॥ विषयग्रहणेनासद्विष असद्विषयोयस्यज्ञा तस्यतं
यं विपर्ययमपाकरोति ॥ प्रतिविषयग्रहणेनेंद्रियार्थसंनिकर्षसूचनादनुमानस्मृ
त्यादयस्तु पराकृता भवंति ॥ तदेवं समानासमानजातीयव्यवच्छेदकत्वात्प्रतिविषय ९

9A

तंज्ञोतरेषु १ शास्त्रकाराणां १

ध्यवसायइतिहृष्टमसंपूर्णलक्षणं॥लक्षणांतराणितैर्थिकानांनभूषितानिनदू
षितानिविस्तरभयादिति॥नानुमानंप्रमाणमितिवदतालोकायतिकेनाप्रतिप
न्नःसंदिग्धोविपर्यस्तोवापुरुषःकथंप्रतिपाद्येत॥नचपुरुषांतरगताअज्ञान
संदेहविपर्ययाःशक्याअर्वाग्दृशाप्रत्यक्षेणप्रतिपत्तुं॥नापिमानांतरेणानभ्यु
पगमात्॥अनवक्लृप्तज्ञानसंशयविपर्ययासस्तुयंकंचित्पुरुषंप्रतिवर्त्तमानोअन
वधेयवचनतयाप्रेक्षावद्भिरुन्मत्तवदुपेक्ष्येततदनेनाज्ञानादयःपरपुरुषवर्त्ति
नोऽभिप्रायभेदाद्वचनभेदाद्वालिंगादनुमानव्यापारस्यकामिनाप्यनुमानमभ्युपेयं ८
॥नचप्रत्यक्षकार्यत्वादनुमानंप्रत्यक्षानंतरंलक्षणीयं॥तत्रापिसामान्यलक्षण
पूर्वकत्वाद्विशेषलक्षणस्यानुमानसामान्यंतावल्लक्षयतिलिंगलिंगिपूर्वकमि

ज्ञाविशेषभेदात्तत्व

ति ॥ लिंगं व्याप्यं ॥ लिंगि व्यापकं ॥ उक्तसमारोपितोपाधिनिराकरणेन वस्तुस्व
भावप्रतिबद्धं व्याप्यं येन प्रतिबद्धं तद्व्यापकं ॥ लिंगलिंगिग्रहणेन विषयवाचिना
विषयिणं ॥ प्रत्ययमुपलक्षयति ॥ धूमादिर्व्याप्यो वह्न्यादिर्व्यापक इति यः प्रत्य
यस्तत्पूर्वकं ॥ लिंगिग्रहणं चावर्जनीयं ॥ तेन च लिंगमस्यास्तीति पक्षधर्मताज्ञान
मपि दर्शितं भवति ॥ तद्व्याप्यव्यापकभावपक्षधर्मताज्ञानपूर्वकमनुमानमिति ॥ अ
नुमानसामान्यं लक्षितं ॥ अनुमानविशेषांस्तंत्रांतरलक्षितानभिमतान्स्मारय
ति ॥ त्रिविधमनुमानमिति ॥ तत्सामान्यतो लक्षितं विशेषतस्त्रिविधं पूर्ववच्छेष
वत्सामान्यतोदृष्टं चेति ॥ तत्र प्रथमं तावद्द्विविधं वीतमवीतं च ॥ अन्वयमुखेन प्रव
र्त्तमानं विधायकं वीतं ॥ व्यतिरेकमुखेन प्रवर्त्तमानं निषेधकमवीतं ॥ तत्रावीतं शे १०

10A

षवत् ॥ शिष्यते परिशिष्यते इति शेषः ॥ स एव विषयतया यस्यास्त्यनुमान
ज्ञानस्य तच्छेषवत् ॥ यदाहुः ॥ प्रसक्तप्रतिषेधेऽन्यत्राप्रसंगात् शिष्यमाणे सं
प्रत्ययः परिशेष इति ॥ अस्य चावीतस्य व्यतिरेकिण उदाहरणमग्रेऽभिधास्य
ते ॥ वीतं च द्वेधा ॥ दृष्टस्वलक्षणसामान्यविषयं यत्तत्पूर्ववत् ॥ पूर्वं प्रसिद्धं दृ
ष्टं स्वलक्षणसामान्यमिति यावत् ॥ तदस्य विषयत्वेनास्त्यनुमानज्ञान
स्येति पूर्ववत् ॥ यथा धूमादग्नित्वसामान्यविशेषः पर्वतेऽनुमीयते ॥ तस्य
वह्नित्वसामान्यविशेषस्य स्वलक्षणं वह्निविशेषो दृष्टो रसवत्यां ॥ अपरं च वी
तं सामान्यतो दृष्टं ॥ अदृष्टस्वलक्षणसामान्यविषयमनुमानं ॥ यथेन्द्रियवि
षयमनुमानं ॥ अत्र हि रूपादिज्ञानानां क्रियात्वेन करणत्वमनुमीयते ॥

सांख्य०

११ यद्यपि च करणत्वसामान्यस्य छिदादौ वास्यादि स्वलक्षणमुपलब्धं तथापि

यज्जातीयं रूपादिज्ञाने करणमनुमीयते॥ तज्जातीयकरणस्य न दृष्टं स्वलक्ष

णं प्रत्यक्षेण॥ इंद्रियजातीयं हि तत्करणं न चेंद्रियत्वस्य सामान्यस्य लक्षणमिं

द्रियं प्रत्यक्षगोचरोऽर्वाग्दृशां॥ यथा वह्नित्वसामान्यस्य स्वलक्षणं वह्निः॥ सोयं

पूर्ववतः सामान्यतोदृष्टात् सत्यपि वीतत्वे न तुल्यत्वे विशेषः॥ अत्र दृष्टं सामा

न्यत इति सामान्यस्य सार्वविभक्तिकस्तसिः॥ अदृष्टस्वलक्षणस्य सामान्यस्य

दर्शनमनुमानमित्यर्थः॥ सर्वं चैतदस्माभिर्न्यायवार्त्तिकतात्पर्यटीकायां व्यु

त्पादितमिति नेहोक्तं विस्तरभयादिति॥ आप्तश्रवणमनुमानंतरं प्रयोज्य हेतुं प्रदर्श

त्रिहेतुज्ञानानुमानपूर्वकत्वाच्छब्दार्थसंबंधग्रहस्य स्वार्थसंबंधग्रहमह ११

दर्शनं ५

घटानयनानुकूलो...
...नवान् घटानयनानु...
...

11A

कारिणश्च शाब्दस्य प्रत्यापकत्वात् ॥ अनुमानानंतरं शाब्दं लक्षयति ॥ आप्तश्रुति
राप्तवचनं त्विति ॥ आप्तवचनमिति लक्ष्यनिर्देशः परिशिष्टं लक्षणं ॥ आप्ता प्राप्ता
युक्तेति यावत् ॥ आप्ता चासौ श्रुतिश्चेति आप्तश्रुतिः ॥ श्रुतिर्वाक्यजनितं वाक्या
र्थज्ञानं तच्च स्वतः प्रमाणं ॥ अपौरुषेयवेदजनितत्वेन सकलदोषाशंकाविनिर्मु
क्तं भवति ॥ एवं वेदमूलस्मृतीतिहासपुराणजनितमपि ज्ञानं युक्तं ॥ आदिविदुषश्च
कल्पादौ कल्पांतराधीतश्रुतिस्मरणसंभवः सुप्तप्रतिबुद्धस्येव पूर्वेद्युरवगताना
मर्थानां अपरेद्युः ॥ तथाचावट्यजैगीषव्ययोः संवादे भगवान् जैगीषव्यो दशा
महाकल्पवर्त्तिजन्मस्मरणमात्मन उवाच दशमहासर्गेषु विपरिवर्त्तमानेन म
येत्यादि संदर्भेण ॥ आप्तवचनेनायुक्ताः शाक्यभिक्षुनिर्ग्रंथकसंसारमोचकादी

अवट्यजैगीषव्ययोः संवा
दः वट्यनामानं प्रति जैगी
षव्य उवाच ह

१५

सारस्व०

१२

12

नामागमाभासाः परिहृता भवंति ॥ अयुक्तत्वं चैतेषां विगानात् विछिन्नमूलत्वा
त्प्रमाणविरुद्धार्थाभिधानात् ॥ केश्चिदेव म्लेछादिपुरुषापसदैः पशुप्रायैः परि
गृहीतत्वाच्च ॥ तुशब्देनानुमानाद्यवछिनत्ति ॥ वाक्यार्थः प्रमेयः ॥ ननु तद्धर्मो वाक्यं
येन तत्र लिंगं भवेत् ॥ न च वाक्यं वाक्यार्थं बोधयत् संबंधग्रहणमपेक्षते ॥ अभि
नवकविविरचितवाक्यस्याहृष्टपूर्वस्याननुभूतचरवाक्यार्थबोधकत्वादिति ॥ ए
वं प्रमाणसामान्यलक्षणेषु तद्विशेषलक्षणेषु च सत्सु यानि प्रमाणांतराणि उ
पमानादीनि प्रतिवादिभिरभ्युपेयंते ॥ नान्युक्तलक्षणेष्वेव प्रमाणेष्वंतर्भवंती
ति ॥ तथा हि उपमानं तावत् यथा गौस्तथा गवय इति वाक्यं तज्जनिताधीरागम एव
॥ योप्ययं गवयशब्दो गोसदृशस्य वाचक इति प्रत्ययः सोप्यनुमानं ॥ यो हि शब्दो व १२

गवयशब्दो गोसादृश्यस्य वाचकोऽसति वृत्त्यंतरे वृद्धैः गोसदृशे प्रयोज्यमानत्वात् १

12A

च दृष्टेऽप्युच्यते सोऽसंनिहितत्वं तेनेतस्य वाचको यथा गोशब्दो गोत्वस्य ॥ प्रयुज्यते वै
षगवयशब्दो गोसदृशे इति तस्यैव वाचक इति तज्ज्ञानमनुमानमेव ॥ यद्गवयस्य
चक्षुः संनिकृष्टस्य गोसादृश्यज्ञानं तत्प्रत्यक्षं ॥ एवं स्मर्यमाणायां गवि गवय
सादृश्यज्ञानं प्रत्यक्षं ॥ नह्यन्यद्विसादृश्यमन्यच्च गवये ॥ भूयोवयवसामान्ययो
गो जात्यंतरवर्त्तिजात्यंतरे सादृश्यमुच्यते ॥ सामान्ययोगश्चैकः सर्वेऽवयवे प्रत्यक्षो
गव्यपि तथैवेति नोपमानस्य प्रमेयांतरमस्ति यत्र प्रमाणांतरं भवेदिति न प्रमाणांतर
मुपमानमिति ॥ एवमर्थापत्तिरपि न प्रमाणांतरं ॥ तथाहि ॥ जीवतः चैत्रस्य गृहा
भावदर्शनेन वहिर्भावस्यादृष्टस्य कल्पनमर्थापत्तिरभिमता वृद्धानां ॥ साप्यनुमा
नमेव ॥ यदा खलु व्यापकः सर्वैकत्र नास्ति तदाऽन्यत्रा[illegible]स्ति ॥ यदाव्यापकएक

सारत्न० चास्ति तदाप्यत्र नास्तीति सुकरः स्वशरीरे व्याप्तिग्रहः ॥ तथाऽसतो गृहाभावदर्शने
नलिंगेन वहिर्भावदर्शनमनुमानं ॥ न वै चैत्रस्य क्वचित्सत्त्वेन गृहाभावः शक्यो
१३ ऽपह्नोतुं येनासिद्धो गृहाभावो न हेतुः स्यात् गृहाभावेन वा सत्त्वमपह्नूयते येन
13 सत्त्वमेवानुपपद्यमानमात्मानं वहिरवस्थापयेत् ॥ तथा हि ॥ चैत्रस्य गृहास
त्त्वेनासत्त्वमात्रं वा विरुध्येत ॥ गृहसत्त्वं वा ॥ न तावदत्र क्वचन सत्त्वस्यास्ति विरोधो
गृहासत्त्वेन भिन्नविषयत्वात् ॥ देशसामान्येन गृहविशेषाक्षेपोऽपि पाक्षिक इति सम्भा
नविषयतयाविरोध इति चेत् ॥ न ॥ प्रमाणेन निश्चितस्य गृहे ऽसत्त्वस्य पाक्षिकतया
सांशयिकेन गृहसत्त्वेन प्रतिक्षेपायोगात् ॥ नापि प्रमाणनिश्चितो गृहाभावः पाक्षि
कमस्य गृहे सत्त्वं प्रतिक्षिपन्सत्त्वमपि प्रतिक्षेप्तुं सांशयिकत्वेवोपनेतुमर्हतीति १३

13A

युक्तं॥ गृहा वह्नित्वेनैव चैत्राभावेन गृहे सत्वं विरुद्धत्वात् प्रतिक्षिप्यते॥ ननु सत्वमा
त्रं॥ तस्य तत्रौदासीन्यात्॥ तस्माद्गृहाभावेनसिद्धेन सतो वहिर्भावोनुमीयत इति
युक्तं॥ एतेन विरुद्धयोः प्रमाणयो रविरोधोपादानं विषय व्यवस्थया र्थापत्ते र्वि
षय इति निरस्तं॥ अवच्छिन्नानवच्छिन्नयो र्विरोधाभावात्॥ उदाहरणांतराणि चार्था
पत्ते रेवानुमानेन्तर्भावितानि॥ तस्मान्नानुमानान्प्रमाणांतरमर्थापत्ति रिति सि
द्धं॥ एवमभावोपि प्रत्यक्षमेव॥ नहि भूतलस्य परिणाम विशेषात् केवलल क्षणा
दन्यो घटाभावो नाम॥ प्रतिक्षण परिणामिनो हि सर्वे एव भावाः॥ ऋते चितिशक्तेः
॥ सच परिणाम भेद ऐंद्रियक इति नास्ति प्रत्यक्षा नवरुद्धो विषयो यत्राऽभावाख्यं
प्रमाणांतर मभ्युपेयमिति॥ संभवस्तु यथा॥ खार्यां द्रोणा ढक प्रस्यावगमः स

४३

सांतकौ० 14

१४

चानुमानमेव॥ खारीत्वं द्रोणाविनाभूतं प्रतीतं खार्यां द्रोणादिसत्त्वमवगमयती
ति॥ यच्चानिर्दिष्टप्रवक्तृकं प्रवादपारंपर्यमात्रमितिहोचुरित्यैतिह्यं॥ यथेह
वटे यक्षः प्रतिवसतीति॥ न तत्प्रमाणमनिर्दिष्टप्रवक्तृकत्वेन सांशयिकत्वात्॥ आ
प्तप्रवक्तृकत्वनिश्चये त्वागम इत्युपपन्नं त्रिविधं प्रमाणमिति॥ एवं तावद्व्यक्ताव्यक्त
ज्ञलक्षणप्रमेयसिद्ध्यर्थं प्रमाणानि लक्षितानि॥ तत्र व्यक्तं पृथिव्यादिस्वरूपतः
पांसुलपादो हालिकोऽपि प्रत्यक्षतः प्रतिपद्यते पूर्ववता चानुमानेन धूमादिदर्शना
द्वह्न्यादीनि॥ तद्व्युत्पादनाय मंदप्रयोजनं शास्त्रमिति दुरधिगमेन न व्युत्पाद्यं॥ त
त्र यत्प्रमाणं यत्र समर्थं तदुक्तलक्षणप्रमाणेभ्यो निःकृष्य दर्शयति॥ सामान्यत
स्तु दृष्टादतीन्द्रियाणां प्रतीतिरनुमानात्॥ तस्मादपि चासिद्धं परोक्षमाप्तागमात् १४

भूलस्थलितदेवपादयोर्य
स हलेन वाहिको हाली पुरु
ष: पृथिव्यादिस्वरूपतः सो
माना तिनतु विशेषेण ४
वं बह्न्यादिसिद्धये मंद
नाथ प्रवर्तते ३
नादृष्टं येपवदेद्याम
मतीन्द्रियाणां

सांख्यशास्त्रेण प्रव
ति पुरुषार्थं ३

14A

दनुमाना१

सिद्धं ॥ तुशब्दः प्रत्यक्षपूर्वकाद्विशिनष्टि ॥ सामान्यतोदृष्टादध्यवसायादतीन्द्रिया
णां प्रधानपुरुषादीनां प्रतीतिः चितिच्छायापत्तिः बुद्धेरध्यवसाय इत्यर्थः ॥ उपल
(अनुमानेन =) क्षणं चैतच्छेषवत इत्यपि द्रष्टव्यं ॥ तत्किं सर्वेष्वतीन्द्रियेषु सामान्यतोदृष्टमेव प्रवर्त्त
(सामान्यतोदृष्टं =) (= महदादीनां) ते ॥ तथा च यत्तत्रास्ति ॥ महदाद्यारंभक्रमे स्वर्गपूर्वदेवतादौ च तेषामभावः प्राप्नो
(सति) त्यत आह तस्मादपि चासिद्धं ॥ परोक्ष[illegible]मागमात्सिद्धं तस्मादपीति सिद्धे चकारेण
(बौद्धेसाङ्ख्येपक्षे:) शेषवत इत्यपि समुच्चितं ॥ स्यादेतत् ॥ यथा गगनकुसुमकूर्मरोमनरविषाणादिषु
प्रत्यक्षमप्रवर्त्तमानं तदभावमवगमयति एवं प्रधानादिष्वपि तत्कथं तेषां सामा
न्यतोदृष्टादिभ्यः सिद्धिरित्यत आङ्कः ॥ अतिदूरात्सामीप्यादिन्द्रियघातान्मनोऽनव
स्थानात् ॥ सौक्ष्म्याद्व्यवधानादभिभवात्समानाभिहाराच्च ॥ चानुपलब्धिरिति वक्ष्य

अति[illegible]
तिइदंता [illegible]
न्यवेनइदंतन्यदीम
आदिपदेनमे घवदना
नोपाद्ये महदादिइद्यंन
नीकं १

मालं सिंहावलोकितन्यायेनानुषंजनीयं ॥ यथा उत्पतन्न् वियति पतत्री अतिदूरतया
सन्नपि प्रत्यक्षेण नोपलभ्यते ॥ सामीप्यादित्यत्राप्यतिरनुवर्त्तनीयः ॥ यथा लोचनस्थ
मंजनमतिसामीप्यान्न दृश्यते ॥ इंद्रियघातोंऽधत्वबधिरत्वादिः ॥ मनोऽनवस्थानात्
यथा कामाद्युपहतमनाः स्फीतालोकमध्यवर्त्तिनं इंद्रियसंनिकृष्टमप्यर्थं न पश्यति
सौक्ष्म्याद्यथेंद्रियसंनिकृष्टं परमाण्वादि प्रणिहितमना अपि न पश्यति ॥ व्यवधाना
त् ॥ यथा कुड्यादिना व्यवहितं राजदारादि न पश्यति ॥ अभिभवात् ॥ यथाह्नि सौरभि
र्भाभिरभिभूतं ग्रहनक्षत्रमंडलं न पश्यति ॥ समानाभिहारात् ॥ यथा तोयदविमुक्तो
दविंदून् जलाशये न पश्यति ॥ चकारोऽनुक्तसमुच्चयार्थः ॥ तेनानुद्भवोऽपि संगृहीतः
॥ तद्यथा क्षीराद्यवस्थायां दध्यादि अनुद्भवान्न दृश्यते ॥ एतदुक्तं भवति ॥ नत्वसत्त्वेनि

प्रधान:
प्रदेवरसंवै [illegible]

15A

जनः२ पुरुषः१

ह्यन्निमात्राह स्त्वभावो भवति । ॥ अति प्रसंगात् नयाहि । गद्दाह्यि निर्गतो गदह जनम
गहनत्नुस
पदूपं स्तदभावं विनिश्चिनु यात् ॥ अपितु योग्यप्रत्यक्षानि ह्वेन्न रयमभावं विनिश्चिनो
ति । नच प्रधान पुरुषादीनामस्ति प्रत्यक्ष योग्यतेति तन्निहन्निमात्रा न्नत दभावसि
कीरतेषु
द्धयोयुक्तः प्रमाणिकानामिति ॥ कतमस्तु नरेतेषु कारणं प्रधानादीनामनुपलब्धौ ।
वित्यत आह ॥ सौक्ष्म्यान्नदनुपलब्धिर्नाऽभावात् कार्यतस्तदुपलब्धेः ॥ महदादि
तच्च कार्यं प्रकृतिसरूपं विरूपं च ॥ ८ ॥ अयथाभावादेव सन्न मरसंवदेतेषामनुप
लब्धिः कस्मान्न भवतीत्यत आह नाभावात् ॥ कुतः ॥ कार्यतस्तदुपलब्धेः ॥ तदिति
प्रधानं परामृशति ॥ पुरुषोपलब्धौ तु प्रमाणं वक्ष्यति ॥ संघातपरार्थत्वादिति
॥ हद नरप्रमाणावधारिते हि प्रत्यक्षमप्रवर्त्तमानमयोग्यत्वान्नप्रवर्त्तत इति क

मारव्यं

१६

16

ल्पते॥ मसन्नमस्कारस्तोनप्रमाणेनावधारित इति नतत्र प्रत्यक्षायोगपताशक्याध्य
वसानुमित्यभिप्रायः किंपुनस्तत्कार्यं यतः प्रधानानुमानमित्यत आह॥ मह
दादि तच्च कार्यं॥ एतच्च यथागमकं तथोपरिष्टादुपपादयिष्यते॥ तस्य च कार्य
स्य विवेकज्ञानोपयोगिनां सारूप्य वैरूप्ये आह॥ प्रकृतिसरूपं विरूपं च॥ एते अ
परिष्टाद्विभजनीये इति कार्यात्कारणमात्रं गम्यते॥ संति चात्र वादिनां विप्रतिप
त्तयः॥ केचिदाहुः॥ असतः सज्जायते॥ एकस्य सतो विवर्त्तः कार्यजातं नवस्तु
सदित्यपरे॥ अन्ये तु सतोऽसज्जायत इति॥ सतः सज्जायत इति वृद्धाः॥ तत्र पूर्वस्मि
न् विकल्पत्रये प्रधानं नसिध्यति॥ सुखदुःखमोहभेदवच्छब्दाद्यात्मकत्वं हि
जगत्कारणस्य प्रधानत्वं सत्वरजस्तमः स्वभावत्वं॥ यदि पुनरसतः सज्जायेत १६

स्वरूपरिणाम२

16A

का॰पं१

सन्निरूपाख्यं कारणं सुखादिरूपशब्दाद्यात्मकं कार्यं स्यात्॥ सदसतोस्तादा
त्म्यानुपपत्तेः॥ अथ सतो विवर्त्तः शब्दादि प्रपंचस्तथापि सतः सज्जायत इति न स्या
त्॥ न चास्याद्वयस्य प्रपंचात्मकत्वं अपि तु अप्रपंचस्य प्रपंचात्मकतया प्रतीति
र्भ्रम एव॥ येषामपि कणभक्षाक्षचरणतनयादीनामसत एव कारणादसतो जन्म
तेषामपि सदसतोरेकत्वानुपपत्तेर्न कार्यात्मकं कारणमिति न प्रधानसिद्धिः
॥ अतः प्रधानसिध्यर्थं प्रथमं तावत्सत्कार्यं प्रतिजानीते॥ असदकारणादुपादान
ग्रहणात्सर्वसंभवाभावात्॥ शक्तस्य शक्यकरणात्कारणभावाच्च सत्कार्यं सत्का
र्यं कारणव्यापारात्प्रागपीति शेषः॥ तथा च न सिद्धसाधनं नैयायिकतनयैरुद्भाव
नीयं॥ यद्यपि बीजमृत्पिंडादि प्रध्वंसानंतरं अंकुरघटाद्युपलभ्यते॥ त

शेषपदग्रहणोसति२ सिद्धस्य साधनं२

सांख्य० स्यापि न प्रध्वंसस्य कारणत्वमपि तु भावस्यैव ॥ बीजाद्यवयवस्य ॥ स्वभावानुभा
वोत्पत्तेनान्तस्य सर्वत्र सुलभत्वात् ॥ सर्वदा कार्योत्पाद प्रसंगइत्यादि न्यायवार्त्तिक
१७ तात्पर्यटीकायामभिहितमस्माभिः ॥ प्रपंच प्रत्ययश्चासति वाधके न शक्यो
17 मिथ्येति वदितुमिति ॥ कणभक्षाक्षचरणमतमवष्टभ्यते ॥ तच्चेदं प्रतिज्ञातं म
स्त्कार्यमिति ॥ अत्र हेतुमाह ॥ असदकरणात् ॥ असत्त्वे त्कारणव्यापारात्पूर्वं का
र्यं नास्य सत्त्वं कर्त्तुं केनापि शक्यं ॥ नहि नीलं शिल्पिसहस्रेणापि पीतं कर्त्तुं शक्य
ते ॥ सदसत्त्वे घटस्य धर्माविति चेत् तथाप्यसति धर्मिणि न तस्य धर्म इति सत्त्वं न
द्रवस्यमेव तथा च नासत्त्वं असंबंधे न तदात्मनावासत्त्वेन ॥ कथमसन् घट १७
स्तस्मात्कारणव्यापारादूर्ध्वमिव ततः प्रागपि सदेव कार्यमिति ॥ कारणाच्चास्य

17A

सतोऽभिव्यक्तिरवशिष्यते ॥ सतश्चाभिव्यक्तिरुपपन्ना ॥ यथा पीडनेन तिलेषु तैल
स्य ॥ अवघातेन धान्येषु तंडुलानां ॥ दोहनेन सौरभेयीषु पयसः ॥ असतः कर
णेतु न निदर्शनं किंचिदस्ति ॥ न खल्वभिव्यज्यमानं वोत्पद्यमानं वा क्वचिदसद्दृष्टं
आर्यार्थः
इतश्च कारणव्यापारात्प्राक् सदेव कार्यमित्याह ॥ उपादानग्रहणात् ॥ उपादानानि
कारणानि तेषां ग्रहणं कार्येण संबंधः उपादानैः कार्यस्य संबंधादिति यावत् ॥ ए
तदुक्तं भवति ॥ कार्येण संबद्धं कारणं कार्यस्य जनकं संबंधश्च कारणैः कार्यस्यास
तो न संभवति ॥ तस्मात्सदिति ॥ स्यादेतत् ॥ असंबद्धमेव कारणैः कार्यं कस्मान्न ज
न्यते ॥ तथा चासदेवोत्पत्स्यत इत्यत आह ॥ सर्वसंभवाभावात् ॥ असंबद्धस्य जन्यत्वे
असंबद्धत्वाविशेषेण सर्वं कार्यजातं सर्वस्माद्भवेत् ॥ न चैतदस्ति ॥ तस्मात् संबद्धं

सं कार्यत्वस्याऽविशेषेण१

नासंबद्धमसंबद्धेन जन्यते अपि तु१ कारणेन१

सर्वस्मात्सर्वेषां संभवस्याभावस्तस्मात्२ कार्यस्य२

कार्यं१

स्य२

सांख्य० संबद्धं न जन्यते॥ यथाहुः सांख्यवृद्धाः॥ असत्त्वे नास्ति संबंधः कारणैः सत्त्वसंगिभिः।
असंबद्धस्य चोत्पत्तिमिच्छतो न व्यवस्थितिरिति॥ स्यादेतत्॥ असंबद्धमपि तदेव क-
१८ रोति यत्र यत्कारणं शक्तं शक्तिश्च कार्यदर्शनादवगम्यते तेन नाव्यवस्थेत्यत आ-
18 ह शक्तस्य शक्यकरणात्॥ सा शक्तिः शक्तकारणाश्रया सर्वत्र वा स्यात् शक्ये वा सर्व-
त्र चेत्तदवस्थैवाव्यवस्था॥ शक्ये चेत्कथमसति शक्ये तत्रेति वक्तव्यं॥ शक्तिभे-
द एव स तादृशो यतः किंचिदेव कार्यं न सर्वमिति चेद्धंत भोः शक्तिविशेषः कार्य-
संबंधोऽसंबद्धो वा संबद्धत्वे नासता संबंध इति सत्कार्यं असंबद्धत्वे सैवाव्यवस्थेति
सुष्ठूक्तं शक्तस्य शक्यकरणादिति इतश्च सत्कार्यमित्याह कारणभावाच्च कार्यस्य
कारणात्मकत्वात्॥ नहि कारणाद्भिन्नं कार्यं कारणं च सदिति कथं तदभिन्नं कार्यमस- १८

लिखंति

18A

सङ्कवेत् ॥ कार्यस्य कारणाभेदसाधकानि च प्रमाणानि ॥ न पटस्तंतुभ्यो भिद्यते तं
तुधर्मत्वात् ॥ इह यद्यतो भिद्यते तत्तस्य धर्मो न भवति ॥ यथा गोरश्वस्य धर्मश्च प
टस्तंतूनां ॥ तस्मान्नार्थांतरं उपादानोपादेयभावाच्च नार्थांतरत्वं तंतुपटयोः ॥ य
योरर्थांतरत्वं न तयोरुपादानोपादेयभावः यथा घटपटयोः ॥ उपादानोपादेय
कारणत्वे =
भावश्च तंतुपटयोः ॥ तस्मान्नार्थांतरत्वमिति ॥ इतश्च नार्थांतरत्वं तंतुपटयोः
संयोगाप्राप्त्यभावात् ॥ अर्थांतरत्वे हि संयोगो दृष्टो यथा कुंडबदरयोः अप्राप्ति
नभवतः =
र्वा यथा हिमवद्विंध्ययोः ॥ न चैव संयोगाप्राप्ती तस्मान्नार्थांतरत्वमिति ॥ इतश्च तं
तुभ्यः पटो न भिद्यते गुरुत्वांतरकार्याग्रहणात् ॥ इह वस्माद्भिन्नं तस्मात्तस्य गुरु
त्वांतरकार्यं गृह्यते यथा पलिकस्य स्वस्तिकस्य यो गुरुत्वकार्योऽवनतिविशे
निवती

पलमर्द्धं पीतिपलिकं स्वार्थे
तद्द्विगुणं स्वस्तिकं तस्यार्धं चं।
कर्षचतुष्टयं पलं। कर्षः षोड
शमाषो [illegible] भवति तस्य
[illegible] प्रमाणं भवति।

सांख्य०

१९

19

षस्तस्मात् हि पलिकस्य स्वस्तिकस्यपयो गुरुत्वकार्यो ऽवनतिभेदो ऽधिकः ॥ नच तथा
तंतुगुरुत्वकार्यान्तरं गुरुत्वकार्यांतरं दृश्यते ॥ तस्मादभिन्नस्तंतुभ्यः पट इति ॥
तान्येतान्यवीतान्यभेदसाधनानि ॥ तदेवं भेदे सिद्धे तंतव एव तेनतेन संस्था
नभेदेन परिणताः पटो न तंतुभ्यो ऽर्थांतरं पटः स्वात्मनि क्रियाविरोधबुद्धि
व्यपदेशार्थक्रियाभेदाश्च नैकांतिकं भेदं साधयितुमर्हंतीति ॥ एकस्मिन्नेव तत्त
द्विशेषाविर्भावतिरोभावाभ्यामेतेषामविरोधात् यथा कूर्मस्यांगानि कूर्मशरी
रे निविशमानानि तिरोभवंति निःसरंति चाविर्भवंति न तु कूर्मतस्तदंगान्युत्प
द्यंते प्रध्वंसंते वा ॥ एवमेकस्या मृदः सुवर्णस्य वा घटमुकुटादयो विशेषाः नि
सरंतः आविर्भवंत उत्पद्यंत इत्युच्यंते निविशमानास्तिरोभवंतो विनश्यंतीत्यु १९

19A

चंते॰ नपुनरसतामुत्पादः सतां वानिरोधः॥ यथाह भगवान् कृष्णद्वैपायनः
॥ नासतो विद्यते भावो नाभावो विद्यते सत इति॥ यथा कूर्मः स्वावयवेभ्यः संको
चविकासिभ्यो नभिन्नः एवं कटमुकुटादयोपि [घ] मृत्सुवर्णादिभ्यो नभिन्नाः॥ ए
वं च इह तंतुषु पट इति व्यपदेशो यथेह वने तिलकाः इत्युपपन्नः नचार्थक्रिया
भेदोभेदमापादयति॥ एकस्यापि नानार्थक्रियादर्शनात् यथैक एव वह्निर्दाहकः
पाचकः प्रकाशकश्चेति॥ नाप्यर्थक्रियाव्यवस्था वस्तुभेदव्यवस्थाहेतुः॥ तेषा तंत्वादीनां
मेवव्य[illegible]स्तसमस्तानां त्वर्थक्रियाव्यवस्थादर्शनात् ह्य या प्रत्येकं विष्टयो द वर्मे:
र्शनलक्षणामर्थक्रियां कुर्वंति॥ ननु शिबिकावहनं मिलितास्तु शिबिकां व
हंति॥ एवं तंतवः प्रत्येकं प्रावरणमकुर्वाणा अपि मिलिता आविर्भूतपटभावाः

तुर्यादि १

प्राविरिष्यंति ॥ स्यादेतत् ॥ आविर्भावः पटस्य कारणव्यापारात्प्राक् सन्नसन्वा ॥ सं
श्चेदुत्पत्तेः प्राक् तर्हि असदुत्पादनं ॥ अथासन् ॥ कृतं तर्हि कारणव्यापारेण नहि स
ति कार्यकारणव्यापारं प्रत्युपामः आविर्भावे चाविर्भावांतरकल्पने ऽनवस्था प्र
संगः ॥ तस्मादाविर्भूत पटभावास्तंतवः क्रियंत इति रिक्तं वचः ॥ अथासदुत्पद्य
त इति मते केयमसदुत्पत्तिः ॥ सतो असतो वा सतश्चेत्तदुक्तं तर्हि कारणैः असतो
चेत् ॥ तस्मात् असदुत्पत्त्यंतरमित्यनवस्था ॥ अथोत्पत्तिः पटाद्व्यार्थांतरं अपि तु पट ए
वासौ तथापि यावदुक्तं भवति पट इति तावदुक्तं भवति उत्पद्यत इति ॥ ततश्च पट इ
त्युक्ते उत्पद्यत इति न वाच्यं पौनरुक्त्यात् विनश्यतीत्यपि न वाच्यं विरोधात् ॥ त
स्मादियं पटोत्पत्तिः स्वकारणसमवायो वा स्वसत्तासमवायो वा ॥ उभयथापि २०

पटकारणसमवायः १ पटसत्तासमवायः १

सारव्य० २०

२०

नोत्पद्यते· अथ वृद्धर्थानि कारणानि व्यापार्यन्ते ॥ एवं सत एव पटादेराविर्भावा
य कारणापेक्षेत्युपपन्नं ॥ न च पटरूपेण कारणानां संबंधः ॥ तद्रूपस्याक्रिया
त्वात् क्रियासंबंधित्वाच्च कारणानां ॥ अन्यथाकारकत्वाभावात् ॥ तस्मात्स
त्कार्यमिति सुष्ठूक्तं ॥ तदेवं प्रधानसाधनानुगुणं सत्कार्यमुपपाद्य यादृशं
तत्प्रधानं साधनीयं तादृशमादर्शयितुं विवेकज्ञानोपयोगि व्यक्तवैरूप्यं तावद्
आह ॥ [illegible] हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिंगं ॥ सावयवं परतं
त्रं व्यक्तं विपरीतमव्यक्तं ॥ हेतुः कारणं तद्वत् ॥ यस्य च यो हेतुः तदुपरिष्टाद्व
क्ष्यति ॥ अनित्यं विनाशि· तिरोभावीति यावत् ॥ अव्यापि सर्वपरिणामिनं व्याप्नो
ति· कारणेन हि कार्यमाविष्टं ॥ न कार्येण कारणं ॥ न च बुद्ध्यादयः प्रधानं वैवि

व्याप्तं१ विस्तृ व्याप्नोति१

व्यक्तं हेतुमत् ३

घटोत्पत्त्यर्थानि ... सिद्धं वा ...२

सांत०
मतीत्य व्यापकाः सक्रियं परिस्पंदवत् ॥ यथा हि बुध्यादय उपात्तमुपात्तं देहं त्यजंति
देहांतरं चोपाददत इति तेषां परिस्पंदः ॥ शरीरं पृथिव्यादीनां च परिस्पंदः प्रसिद्ध
२१ एव ॥ अनेकं प्रति पुरुषं बुध्यादीनां भेदात् ॥ पृथिव्याद्यपि शरीरघटादिभेदेनानेकमेव ।
आश्रितं स्वकारणमाश्रितं बुध्यादि कार्यं भेदेपि कथंचिद्भेदविवक्षया आश्रयिभा
(वर्तते) वोयथेह वने तिलक इत्युक्तं ॥ लिंगं प्रधानस्य । यथा चैते बुध्यादयः प्रधानस्य लिं
गं तथा नोपरिष्टाद्वक्ष्यति प्रधानं तु न प्रधानस्य लिंगं ॥ पुरुषस्य तु लिंगं भवदपीति भा
वः ॥ सावयवमिति ॥ अवयवनं अवयवो मिथः संश्लेषो मिश्रणं संयोग इति यावत्
अप्राप्तिपूर्विका प्राप्तिः संयोगस्तेन (संयोगेन) सह वर्त्तत इति सावयवं ॥ तथा हि ॥ पृथिव्या
दयः परस्परं संयुज्यंते । एवमन्येपि ॥ ननु प्रधानस्य बुध्यादिभिः संयोगस्तादात्म्यात् २१

31A

नापि सत्वरजस्तमसां परस्परं संयोगश्च प्राप्तेरभावात् ॥ परतंत्रं ॥ बुध्या हि स्वकार्ये
हंकारे जनयितव्ये प्रकृत्यापूरोऽपेक्ष्यते । अन्यथा क्षीणा सती नालमहंकारं जन-
यितुमिति स्थितिः एवमहंकारादिभिरपि स्वकार्यजनने इति सर्वैः स्वकार्ये प्रकृ-
त्यापूरमपेक्ष्यते ॥ तेन प्रकृतिं परामपेक्षमाणं कार्योपजनने परतंत्रं व्यक्तं ॥ विपरीतम-
व्यक्तं व्यक्तात् ॥ अहेतुमन्नित्यं ॥ व्यापि निःक्रियं ॥ यद्यप्यव्यक्तस्यास्ति परिणामलक्ष-
णा क्रिया तथापि परिस्पंदो नास्तीति ॥ एकमनाश्रितं च ॥ लिंगमनवयवं स्वतंत्रमव्यक्तं
॥ तदनेन प्रबंधेन व्यक्ताव्यक्तयोर्वैधर्म्यमुक्तं ॥ संप्रति तयोः साधर्म्यं ॥ पुरुषाच्चवैध-
र्म्यमाह ॥ त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि ॥ व्यक्तं तथा प्रधा-
नं तद्विपरीतस्तथा च पुमान् ॥ त्रयो गुणाः सुखदुःखमोहाः अस्येति त्रिगुणं ॥ त-

स्वस्मात्प्रधानरूपात् न महदादीनां विविच्यते परमतोऽवि २ त्रिगुणं १

नैकस्मात्र

सां० त० कौ० अनेन सुखादीनामात्मगुणत्वं पराभिमतमपाकृतं ॥ अविवेकि ॥ यथा प्रधानं न स्व
तो विविच्यते. एवं महदादयोपि न प्रधानाद्धि विच्यंते. तदात्मकत्वात् ॥ अथवा सं
२२ भूयकारिता ऽविवेकः न किंचिदेकं पर्याप्तं कार्येपि तु संभूय तत्रैकस्य चित्केन
22 चित्कचित्संभवः इति ॥ यत्त्वाहुः विज्ञानमेव हर्षविषादशब्दाद्याकारं न पुनरितो
न्यत् धर्मि तितान्प्रत्याह विषयो ग्राह्यः विज्ञानाद्बहिरिति यावत् ॥ अत एव सा
मान्यं साधारणं विज्ञानाकारत्वे त्व साधारण्यं हि विज्ञानानां हि त्रिरूपाणां तेषां सा
धारण्यः स्युः ॥ तथा च नर्तकी भ्रूलताभंगे एकस्मिन् बहूनां प्रतिसंधानं युक्तं. अ
न्यथा तन्न स्यादिति भावः ॥ अचेतनं सर्व एव प्रधानबुद्ध्यादयो ऽचेतनाः न तु वैनाशि
कवच्चैतन्यं बुद्धेरित्यर्थः ॥ प्रसवधर्मि ॥ प्रसवरूपो धर्म्मः सो स्यास्तीति प्रसवधर्मि २२

विषयस्य ऽप्रमाने स्मृतिः

(हाशिये पर: ...दिवृद्धनेकप्रत्यग्रही ...र्षाः ४ ...यथापरेणनत्प्रत्ते ...द्भासमानवीदिनाति)

९२A

प्रसवधर्मेति वक्तव्ये मत्व र्थीयः प्रसवधर्मस्य नित्ययोगमाख्यातुं ॥ सरूप विरूप प
रिणामाभ्यां नक दाचिदपि वियुज्यत इत्यर्थः ॥ व्यक्तं हन्त मंति दिशति ॥ तथा प्रधानं
ताभ्यां वैधर्म्यं पुरुषस्याह॰ तद्विपरीतस्तथा च पुमान् ॥ स्यादेतत् ॥ अहेतुमत्व नित्यत्वा
दिप्रधानसाधर्म्यमस्ति पुरुषस्य ॥ एवमनेकत्वं व्यक्त साधर्म्यं ॥ तत्कथमुच्यते त
द्विपरीतः पुमानित्यत आह ॥ तथा च चकारो प्यर्थः ॥ अपि अहेतुमत्वादि साधर्म्यं ॥ त
थाप्यत्रैगुण्यादि वैपरीत्यमस्येत्यर्थः ॥ ११ त्रिगुणमित्युक्तं तत्र के ते गुणाः इत्यः किं
च तदुपलक्षणमित्याह॰ प्रीत्यप्रीति विषादात्मकाः प्रकाशप्रवृत्ति नियमार्थाः
अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणा इति ॥ १२ गुणा इति परार्थः ॥ सत्वं
रजः प्रकाशकमित्यत्र च सत्वादयः क्रमेण निर्दिश्यंते॰ तदनागतावेक्षणेन तंत्रयुक्त्याव

23

अभावज्ञाने प्रतियोगिज्ञानस्यावश्यंभावात् ६

अप्रीतिरात्मा
भावेत्यादि ५

सांख्य० क्रमोदीनां यथासंख्यं वेदितव्यं ॥ एतदुक्तं भवति ॥ प्रीतिः सुखं प्रीत्यात्मकं सत्त्वगुणः
देप्रीतिः दुःखं अप्रीत्यात्मकं रजोगुणः ॥ विषादात्मको मोहो विषादात्मकं तमोगु
२५ णइत्यर्थः ॥ येनु मन्यंते न प्रीतिर्दुःखाभावादतिरिच्यते ॥ एवं दुःखमपि न प्रीत्यभावा
दन्यदिति तान्प्रत्यात्मग्रहणं ॥ नेतरेतराभावाः सुखादयोपि तु भावाः ॥ आत्मशब्दस्य
भाववचनत्वात् ॥ प्रीतिरात्माभावो येषां ते प्रीत्यात्मानः ॥ एवमन्यदपि व्याख्येयं भावरू
सुखादीनां उभयाभावेसति
पताचैषामनुभवसिद्धा परस्पराभावात्मकत्वे तु परस्पराश्रयापत्तेरेकस्याप्यसिद्धेरुभया
सुखदुःखयोः ३ सिद्धिरिति भावः ॥ स्वरूपमेषामुक्त्वा प्रयोजनमाह-प्रकाशप्रवृत्तिनियमार्थाइति ॥ अत्रा
पि यथासंख्यमेव रजः प्रवर्त्तकत्वात्सर्वत्र लघु, सत्त्वं प्रवर्त्तेयेत् ॥ यदि तमसा गुरुणा न
सत्त्वं १ नियम्येत ॥ तमोनियतं तु क्वचिदेव प्रवर्त्तयतीति भवति तमो नियमार्थं ॥ प्रयोजनमु २३
रोधकं १

23A

क्रियां ३

स्मात्क्रियामाह ॥ अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च ॥ वृत्तिः क्रियां सा च प्र

त्येकमभिसंबध्यते ॥ अन्योन्याभिभववृत्तयः एतेषामन्यतमेनार्थवशादुद्भूतेनान्य

तममभिभूयते ॥ तद्यथा हि ॥ सत्त्वं रजस्तमसी अभिभूय शांतामात्मनो वृत्तिं प्रतिलभ

ते ॥ एवं रजः सत्त्वतमसी अभिभूय घोरां ॥ एवं तमः सत्त्वरजसी अभिभूय मूढामिति

॥ अन्योन्याश्रयवृत्तयः ॥ यद्यप्याधाराधेयभावेन नाश्रयार्थो घटते ॥ तथापि यदपेक्ष

यायस्य क्रिया स तस्याश्रयः ॥ तद्यथा हि ॥ सत्त्वं प्रवृत्तिनियमावाश्रित्य रजस्तमसोः प्र

काशेनोपकरोति रजः प्रकाशनियमावाश्रित्य प्रवृत्त्या तयोः ॥ तमः प्रकाशप्रवृत्ती

आश्रित्य नियमेनेतरयोरिति ॥ अन्योन्यजननवृत्तयः ॥ अन्यतमोऽन्यतमं जनयति ॥

जननं च परिणामः ॥ स च गुणानां सदृशरूपः ॥ अत एव न हेतुमत्त्वं ॥ तत्त्वान्तरस्य हेतो

प्रकार्थं तत्र रजस्तमसोरुप कारं करोति सत्त्वेन म सोः २

परिणामो यादृशो गुणस्त स्यतादृशो भवति नत्वन्यादृ शकादिति १

25

वृत्तयः२

सां०का० भावात्॥ नाप्यनित्यत्वं तत्वांतरे लयाभावात्॥ अन्योन्यमिथुनवृत्तयः॥ अन्योन्यस
हचराः॥ अविनिर्भागवर्त्तिन इति यावत्॥ चः समुच्चये॥ भवति चात्रागमः॥ अन्योन्य
२५ मिथुनाः सर्वे सर्वत्रगामिनः रजसो मिथुनं सत्वं सत्वस्य मिथुनं रजः॥ तमसश्चापि मिथु
नेते सत्वरजसी उभे॥ उभयोः सत्वरजसोर्मिथुनं तम उच्यते॥ नैषामादिः संप्रयोगो
संयोगः
वियोगो वोपलभ्यते॥१२॥ प्रकाशप्रवृत्तिनियमार्था इत्युक्तं तत्र के ते इत्थंभूताः कुत
इत्यत आह॥ सत्वं लघु प्रकाशकमिष्टमुपष्टंभकं चलं च रजः॥ गुरु वरणकमेव त
मः प्रदीपवच्चार्थतो वृत्तिः॥ सत्वमेव लघु प्रकाशकमिष्टं सांख्याचार्यैः॥ तत्र कार्यो
द्गमने हेतुर्धर्मो लाघवं गौरवं प्रतिद्वंद्वि यतोऽग्नेरूर्ध्वं ज्वलनं भवति॥ तदेव लाघवं के
लाघवं प्रति षांचित्तिर्यग्गमनहेतुर्भवति यथा वायोः॥ एवं करणानां वृत्तिपटुत्वहेतुर्लाघवं २५

प्रकाशादीनां१ ज्ञानस्य यत्सामर्थ्यं तत्तस्य पटुत्वं लाघवं१

२४A

गुरुत्वेहि मंदानिसुरिति ॥ सत्वस्य प्रकाशात्मकं मुक्तं ॥ सत्व तमसी स्वयमक्रियतया
स्वकार्ये प्रवृत्तिं प्रत्यवसीदती रजसोपष्टम्भेते त्र्यवसादात् प्रच्याव्य स्वकार्येऽत्साहे
प्रयत्नं कार्यते ॥ तदिदमुक्तमुपष्टंभकं रज इति कस्मादित्यत उक्तं चलमिति ॥ तदने
न रजसः प्रवृत्त्यर्थत्वं दर्शितं ॥ रजस्तु चलतया परितस्त्रैगुण्यं चालयद्गुरुणाऽऽवृ
एवता तमसा तत्र तत्र प्रवृत्तिप्रतिबंधेन क्वचिदेव प्रवर्त्यत इति तत्तस्ततो व्यावृत्त्य तमो
रोधकं
नियामकमुक्तं गुरु वरणकमेव तम इति एवकारः प्रत्येकं भिन्नक्रमः संबध्यते
॥ सत्वमेव रज एव तम एव ॥ ननु च परस्पर विरोधशीला गुणाः सुंदोपसुंदवत्पर
स्परं ध्वंसत इत्येवं युक्तं प्रागेव त्वेषामेकक्रियाकर्तृकतेत्यत आह प्रदीपवच्चार्थतो
वृत्तिः ॥ दृष्टमेतद्यथा वर्त्तिः तैले अनलविरोधिनी अथ च मिलिते सहानलेन रू
भवतः १

सांख्य० यप्रकाशनलक्षणं कार्यं कुरुतः ॥ तथा च वातपित्तश्लेष्माणः परस्परविरोधिनः शरी
रधारणलक्षणकार्यकारिणः ॥ एवं सत्त्वरजस्तमांसि मिथो विरुद्धान्यपि अनुवर्त्स्यं
[illegible] ति च स्वकार्यं करिष्यंति च ॥ अर्थतस्त इति (पुरुषप्रयोजनतः) पुरुषार्थतस्त इति यावत् ॥ यथा च वक्ष्यति ॥ पुरुषा
र्थ एव हेतुर्न केनचित्कार्यते करणमिति ॥ अत्र च सुखदुःखमोहाः परस्परविरोधिनः
9 स्वानुरूपाणि सुखदुःखमोहात्मकान्येव निमित्तानि कल्पयंति ॥ तेषां च परस्परम
भिभाव्याभिभावकभावान्नानात्वं ॥ तद्यथा एकैव स्त्री रूपयौवनकुलशीलसंपन्ना
स्वामिनं सुखाकरोति तत्कस्य हेतोः स्वामिनं प्रति तस्याः सुखरूपसमुद्भवात् ॥ सै
व स्त्री सपत्नीर्दुःखाकरोति तत्कस्य हेतोः सपत्नीः प्रति तस्याः दुःखरूपस्य समुद्भ
वात् ॥ एवं च पुरुषांतरं तामविंदत्सैव मोहयति ॥ तत्कस्य हेतोः तं प्रति तस्या मोहरूप २५

समुद्भवात् ॥ अनया च त्रिधा सर्वे भावा व्याख्याताः ॥ तत्र यत्सुखहेतुस्तत्सुखात्मक
सत्त्वं ॥ यत्दुःखहेतुस्तद्दुःखात्मकं रजः ॥ यन्मोहहेतुः तन्मोहात्मकं तमः ॥ सुखप्रका
शलाघवानां चैकस्मिन्युगपदुद्भूतावविरोधः सहदर्शनात् ॥ तस्मात्सुखदुःखमोहै
रिव विरोधिभिः अविरोधिभिः सुखप्रकाशलाघवैर्न निमित्तभेदा उन्नीयन्ते ॥ एवं दुः
खोपष्टंभप्रवर्त्तकत्वैरेवं मोहगुरुत्ववरणत्वैरिति सिद्धं त्रैगुण्यमिति ॥ १३ ॥ स्यादेतत्
अनुभूयमानेषु पृथिव्यादिष्वनुभवसिद्धाभवं च विवेकित्वादयः ये पुनः सत्त्वाद
यो नानुभवपथमधिरोहन्ति तेषां कुतस्त्यमविवेकित्वं विषयत्वं सामान्यत्वमचेतन
त्वं प्रसवधर्मित्वं चेत्यत आह ॥ अविवेक्यादेः सिद्धिः त्रैगुण्यात्तद्विपर्ययाभावात् ॥ का
रणात्मकत्वात् कार्यस्याव्यक्तमपि सिद्धं ॥ अविवेकित्वमविवेकि यथा व्यक्तयोर्हि

26

सां०त०कौ० ष्ठएकवचनमस्मद्बुद्धित्वैकत्वयोरिति अन्यथा ह्येकेष्विति स्यादिति॥ कुतः पुनरवि

२५ वेकित्वादिसिद्धिरित्यत आह॥ त्रैगुण्यात् यद्यत्सुखदुःखमोहात्मकं तत्तदविवेक्यादि

योगि यथेदमनुभूयमानं व्यक्तमिति स्फुटत्वादन्वयेनोक्तं व्यतिरेकमाह॥ तद्विपर्यया

भावात्॥ अविवेक्यादिविपर्यये पुरुषे त्रैगुण्याभावात्॥ अथवाव्यक्ताव्यक्ते पक्षीकृत्या

न्वयाभावेनैत्रैगुण्यादित्यवीतएव हेतुर्वक्तव्यः॥ स्यादेतत्॥ अव्यक्तसिद्धौ सत्यां तस्या

विवेकित्वादयो धर्म्माः सिध्यंति॥ अव्यक्तमेव त्वद्यापि न सिद्ध्यति॥ तत्कथमविवेकि

त्वादिसिद्धिरित्यत आह॥ कारणगुणात्मकत्वात्कार्यस्य अव्यक्तमपि सिद्धं॥ अयमभि

मिसंधिः कार्यं हि कारणगुणात्मात्मकं दृष्टं यथा तंत्वादिगुणात्मकं पटादि॥ तथा म

हदादिलक्षणेनापि कार्येण सुखदुःखमोहरूपेण स्वकारणगतसुखदुःखमोहा २६

व्य... त्वादिमत... गुण्यात... टवत्यत्राविवेकित्वा दिमत्त्वनवर्ते तेतत्रैगु ण्यं न वर्तते यथा पुरुषेषु

स्व२ स्वरूपमहदादिलक्षण कार्यप्रधानं तत्ता... नांसि

26A

त्मना भवितव्यं ॥ तथा च तत्कारणं सुखदुःखमोहात्मकं प्रधानमव्यक्तं सिद्धं भवति ॥
१४ ॥ स्यादेतत् ॥ व्यक्तात् व्यक्तमुत्पद्यत इति कणभक्षाक्षचरणमतानुयायाः ॥ परमाणवो हि
व्यक्तास्तेभ्यो द्व्यणुकादिप्रक्रमेण पृथिव्यादिलक्षणं कार्यं व्यक्तमारभ्यते पृथिव्यादिषु
कारणगुणप्रक्रमेण रूपाद्युत्पत्तिस्तस्माद्व्यक्ताद्व्यक्तस्य तद्गुणस्य चोत्पत्तेः कृतमदृ
ष्टमचरेणाव्यक्तेनेत्यत आह ॥ भेदानां विशेषाणां महदादीनां भूतानां कारणं मूल
कारणमस्त्यव्यक्तं ॥ कुतः कार्यकारणविभागात् ॥ अविभागाद्वैश्वरूपस्य कारणे स
त्कार्यमिति स्थितं तथा च कूर्मशरीरे सन्त्येवांगानि निःसरंति (आविर्भवंति) विभज्यंते इदं कूर्मश
रीरं एतान्येतस्यांगानि सन्त्येवाविर्भवंति ॥ विभज्यंते च ॥ एवं निविशमानानि तस्मिन्न
व्यक्ती भवंति ॥ एवं मृत्पिंडहेमपिंडाद्याकार्याणि कुटमुकुटादीनि सन्त्येवाविर्भवंति

सांतकौ० [वि]भज्यंते ॥ संत्येव पृथिव्यादीनि कारणात्तन्मात्रादाविर्भवंति विभज्यंते ॥ संत्येव तन्मा
त्राण्यहंकारात् ॥ सन्त्येवाहंकारः कारणान्महतः ॥ संत्येव च महान् परमाव्यक्तादिति
२७ ॥ सोयं कारणात्परमाव्यक्तात् साक्षात्पारंपर्येण विश्वरूपस्य कार्यस्य विभागः ॥ प्रतिसं
गे तु मृत्पिंडं सुवर्णपिंडं वा घटमुकुटादयो विशंतोऽव्यक्ती भवंति ॥ तत्कारणरूप
मेवानभिव्यक्तं कार्यमपेक्ष्याव्यक्तं भवति ॥ एवं पृथिव्यादयः तन्मात्राणि विशंतः स्वापे
क्षया तन्मात्राण्यव्यक्तयंति ॥ एवं तन्मात्राण्यप्यहंकारं विशंति स्वाहंकारमव्यक्तयं
ति ॥ एवमहंकारो महांतमाविशन् महांतमव्यक्तयति ॥ महान् प्रकृतिं स्वकारणं विश
न् प्रकृतिमव्यक्तयति प्रकृतेस्तु नक्वचिन्निवेशाइति सा सर्वकार्याणामव्यक्त
मेव सोयमविभागः ॥ प्रकृतौ वैश्वरूप्यस्य नानारूपकार्यस्य स्वार्थिकः ष्यञ् ॥ तस्मा २७

27A

तस्मात्कारणे कार्यस्य सत एव विभागाऽविभागाभ्यां अव्यक्तं कारणमस्तीति ॥ इत
श्चाव्यक्तमस्तीत्याह शक्तितः प्रवृत्तेश्च ॥ कारणशक्तितः कार्यं प्रवर्त्तत इति सिद्धं ॥
अशक्तात् कारणात्कार्यस्यानुत्पत्तेः ॥ शक्तिश्च कारणगता न कार्यस्याव्यक्तत्वाद
न्या न हि सत्कार्यपक्षे कार्यस्याव्यक्ततायाश्चान्यस्यां शक्तौ प्रमाणमस्ति ॥ अयमेव
हि सिकताभ्यस्तिलानां तैललोपादानानां भेदो यदेतेषु एवं तैलं अस्ति अनागतावस्थं
न सिकतास्विति ॥ स्यादेतत् शक्तितः प्रवृत्तिः कारणकार्यविभागाविभागौ वम
हत एव परमाव्यक्तत्वं साधयिष्यत इति कृतं ततः परेणाव्यक्तेनेत्यत आह ॥ परिमा
णात् ॥ परिमितत्वात् ॥ अव्यापित्वादितियावत् ॥ विवादाध्यासिता महदादिभेदा अव्यक्तका
रणवन्तः ॥ परिमितत्वात् ॥ घटादिवत् ॥ घटादयो हि परिमिता मृदाद्यव्यक्तकारण

28

सां०त०

१७

पंक्तौदृष्टाः ॥ उक्तमेतत् ॥ यथा कार्यस्याव्यक्तावस्था कारणमेवेति ॥ यन्महतः कारणं त
त्परमाव्यक्तं ॥ ततः परतरस्याऽव्यक्तकल्पनायां प्रमाणाऽभावात् ॥ इतश्च विवादाध्या
सिता भेदा अव्यक्तकारणवंतः ॥ समन्वयात् ॥ भिन्नानां समानरूपता समन्वयः ॥ सुख
दुःखमोहसमन्विता हि बुध्यादयोऽध्यवसायलक्षणाः प्रतीयंते ॥ यानि च यद्रूपसम
नुगतानि तानि च तत्स्वभावाव्यक्तकारणानि ॥ यथा मृद्धेमपिंडसमनुगताः कुटमु
कुटादयो मृद्धेमपिंडाव्यक्तकारणका इति ॥ १५ ॥ कारणमस्त्यव्यक्तं भेदानामि
ति सिद्धं ॥ अव्यक्तं साधयित्वा अस्य प्रवृत्तिप्रकारमाह ॥ प्रवर्त्तते त्रिगुणत इति ॥ का
रणमस्त्यव्यक्तं प्रवर्त्तते त्रिगुणतः समुदायाच्च ॥ परिणामतः सलिलवत् प्रति प्रति
गुणाश्रयविशेषात् ॥ प्रतिसर्गावस्थायां सत्वं रजस्तमश्च सदृशपरिणामानि भवंति २८

28A

परिणामस्वभावाहि गुणा नापरिणाम्य क्षणमप्यवतिष्ठंते॥ तस्मात्सत्वं सत्व
रूपतया रजो रजोरूपतया तमस्तमोरूपतया प्रतिसर्गावस्थायामपि प्रवर्त्तंते॥
तदिदमुक्तं त्रिगुणत इति॥ प्रवृत्त्यंतरमाह समुदायाच्च॥ समेत्योदयः समुदयः स
मवायः॥ सश्च गुणानां न गुणप्रधानमंतरेण संभवति॥ न च गुणप्रधानभावो वैष
म्यं विना॥ न च वैषम्यमुपमर्द्योपमर्दकभावादृते इति महदादिभावेन प्रवृत्तिर्द्वितीया
स्यादेतत्॥ कथमेकरूपाणां गुणानामनेकरूपा प्रवृत्तिरित्यत आह॥ परिणाम
तः सलिलवत्॥ यथा हि॥ वारिदविमुक्तमुदकमेकरसमपि तत्तद्विकारान्नारि
केलतालताली विल्वचिरविल्वतिंडुकामलकप्राचीनामलककपित्थफलरस
तया परिणतं मधुराम्लतिक्तकषायकटुतया विकल्पते॥ एवमेकैकगुणसमु

सांख्य त

ङ्गवान्प्रधानं गुणमाश्रित्याप्रधानगुणाः परिणामभेदान्प्रवर्त्तयंतीति ॥ तदिदमुक्तं
प्रतिप्रतिगुणाश्रयविशेषात् ॥ एकैकगुणाश्रयो विशेषस्तस्मादित्यर्थः ॥ १६ ॥ ये तु
तौष्टिकाः अव्यक्तं महांतं (बुद्धिं) वाहंकारं वा इंद्रियाणि वा आत्मानमभिमन्यमानाः ॥ ता
नेवोपासते तान्प्रत्याह ॥ पुरुषोस्ति ॥ संघातपरार्थत्वात्त्रिगुणादिविपर्ययादधिष्ठा
नात् ॥ पुरुषोस्ति भोक्तृभावात्कैवल्यार्थं प्रवृत्तेश्च ॥ अव्यक्तादेर्व्यतिरिक्तः ॥ कुतः पुरुषोस्ति ५
परार्थत्वात्त्रिगुणादिविपर्ययादधिष्ठानात् अव्यक्तमहदहंकारादयः परार्थाः सं
घातत्वाच्छयनासनाभ्यंगादिवत् ॥ सुखदुःखमोहात्मकतया ऽव्यक्तादयः सर्वे सं
घाताः ॥ स्यादेतत् ॥ शयनासनादयः संघाताः संहतशरीराद्यर्थाः दृष्टाः न त्वात्मा
नं प्रति परार्थाः ॥ तस्मात्संघातांतरमेव परं गमयेयुः ॥ न त्वसंहतमात्मानं इत्यत २९

महदादयः १

संघातत्वे [illegible]

२९A

आह ॥ त्रिगुणादिविपर्ययात् अयमभिप्रायः ॥ संघातानां परार्थत्वे हि तस्यापि संघा
तत्वात् ॥ तेनापि संघातान्तरार्थेन भवितव्यं ॥ एवं तेन तेनेत्यनवस्था स्यात् ॥ न चानव
स्थायां सत्यामव्यवस्था युक्ता कल्पनागौरवप्रसंगात् ॥ न च प्रमाणवत्वेन गौरव
मपि मृष्यत इति युक्तं ॥ संघातत्वस्य पारार्थ्यमात्रेणान्वयात् ॥ दृष्टान्तदृष्टसर्वधर्मा
नुरोधेन त्वनुमानमिष्टं ततः सर्वानुमानोच्छेदप्रसंग इति उपपादितमस्माभिः न्याय
वार्त्तिकटीकायां ॥ तस्मादनवस्थाभियाऽसंघातत्वमिष्टं ता त्रिगुणत्वं विवेकि
त्वमविषयत्वमसामान्यत्वं चेतनत्वमप्रसवधर्मित्वं चाभ्युपेयं ॥ त्रिगुणत्वादयो हि
धर्माः संहतत्वेन व्याप्ताः [illegible] तत्व [illegible]स्मिन् परे व्यावर्त्तमानं त्रैगुण्यादि व्यावर्त्तय
ति ॥ ब्राह्मण्यमिव वर्त्तमानं कठत्वादि व्यावर्त्तयति ॥ तस्मादाचार्येण त्रिगुणादि

ननु त्रिगुणत्वं निवर्त्तमानं स्वधर्मं त्रैगुण्यं व्यावर्त्तयति यथा ब्राह्मण्यं वृक्षत्वं च निवर्त्तमानं स्वधर्मं कठत्वादिकं शाखा व्यावर्त्तयतीति २

त्रिगुणत्वमात्मनि २

...विपर्ययादिति वदताऽसंहतः परो विवक्षितः॥ सचात्मेति सिद्धं॥ इतश्च पुरुषोस्ति
सौरव्य ...त्वधिष्ठानात्॥ त्रिगुणात्मकानामधिष्ठीयमानत्वात्॥ यद्यत्सुखदुःखमोहात्मकं
तत्सर्वं परेणाधिष्ठीयमानं दृष्टं॥ यथा रथादि यंत्रादिभिः सुखदुःखमोहात्मकं चे
दं बुद्ध्यादि तस्मादेतदपि परेणाधिष्ठातव्यं॥ सच परस्त्रिगुणादन्य आत्मेति॥ इतश्चा
स्ति पुरुषो भोक्तृभावात्॥ भोक्तृभावेन भोग्ये सुखदुःखे उपलक्षयति॥ भोग्ये हि
सुखदुःखे अनुकूलप्रतिवेदनीये प्रत्यात्ममनुभूयेते॥ तेनानयोरनुकूलनीयेन
प्रतिकूलनीयेन च केनचिदन्येन भवितव्यं॥ नचानुकूलनीयाः प्रतिकूलनीया
वा बुद्ध्यादयः तेषां सुखाद्यात्मकत्वेन स्वात्मनि वृत्तिविरोधात्॥ तस्माद्योऽसुखा
द्यात्मा सोऽनुकूलनीयः प्रतिकूलनीयो वा॥ स आत्मेत्याहुः भोग्याद्दृश्या बुद्ध्यादयः॥

अनुकूलं प्रतिकूलं वेदनीयं वेदनीयं हि ३

स्वरूपं

सचात्मेति १

30A

नच द्रष्टारमंतरेण दृश्यता युक्ता तेषां ॥ तस्माद्स्ति द्रष्टा दृश्य बुद्ध्याद्यतिरिक्तः ॥ सचा
त्मेति ॥ भोक्तृभावात् ॥ द्रष्टृभावात् ॥ दृश्येन द्रष्टुरनुमानादित्यर्थः ॥ दृश्यत्वं च बुद्ध्या
दीनां सुखाद्यात्मकतया पृथिव्यादिवदनुमितं ॥ इतश्चास्ति पुरुष इत्याह ॥ कैवल्या
कैवल्यार्थं प्रवृत्तिः
र्थं प्रवृत्तेश्च ॥ शास्त्राणां महर्षीणां दिव्यलोचनानां च कैवल्यं चात्यंतिकदुःखत्रय
प्रशम लक्षणं न बुद्ध्यादीनां संभवति ॥ ते हि दुःखाद्यात्मकाः कथं स्वभावाद्वियोज
यितुं शक्यंते ॥ तदतिरिक्तस्य त्वात्मनस्ततो वियोगः शक्यसंपादः ॥ तस्मात्कैवल्यार्थं
प्रवृत्ते रागमर्मनां ॥ महाधियां वास्ति बुद्ध्याद्यतिरिक्तश्चात्मेति सिद्धं ॥ तदेवं पुरुषास्ति
त्वं प्रतिपाद्य स किं सर्व शरीरेष्वेकः किमनेकः प्रतिक्षेत्रमिति संशये तस्य प्रतिक्षेत्र
मनेकत्वमुपपादयति ॥ जननमरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च ॥ पुरु
प्रतिक्षेत्रं भिन्नः २

सांख्य ...वहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव ॥ पुरुषवहुत्वं सिद्धं । कस्माज्जननमरणकरणा
नां प्रतिनियमात् ॥ निकायविशिष्टाभिरपूर्वाभिर्देहेंद्रियबुद्धिवेदनाभिः पुरुष
स्याभिसंबंधो जन्म ॥ न पुरुषस्य परिणामः ॥ तस्यापरिणामित्वात् ॥ तेषामेव च दे
हादीनां उपात्तानां परित्यागो मरणं न त्वात्मनो विनाशः ॥ तस्य कूटस्थनित्यत्वात्
करणानि बुद्ध्यादीनि त्रयोदश तेषां जन्ममरणकरणानां प्रतिनियमो व्यवस्था सा
खल्वियं सर्वशरीरेष्वेकस्मिन्पुरुषे नोपपद्यते ॥ तदा खल्वेकस्मिन्जायमाने सर्वे
जायेरन् ॥ म्रियमाणे च म्रियेरन् ॥ अंधादौ चैकस्मिन्सर्व एवांधादयो विचित्ते चैक
स्मिन्सर्व एव विचित्ताः स्युरित्यव्यवस्था प्रतिक्षेत्रं पुरुषभेदे भवति व्यवस्था । न चैक
स्यापि पुरुषस्य देहोपधानभेदाद्व्यवस्थेति युक्तं ॥ पाणिस्तनाद्युपाधिभेदेनापि ज

31A

न्ममरणव्यवस्थाप्रसंगात् ॥ नहि पाणौ वा (छिन्ने) के जाते वास्तनादौ महत्यवयवे युव
तिर्यौना वाप्तावा भवतीति ॥ इतश्च प्रतिक्षेत्रं पुरुषभेद इत्याह ॥ युगपत् प्र
वृत्तेश्चाप्रवृत्तेः ॥ प्रयत्नलक्षणा यद्यप्यन्तःकरणवर्त्तिनी तथापि पुरुष उपच
र्यते ॥ तथा च तस्मिन्नेकस्मिन्नेकत्र शरीरे प्रयतमाने स एव सर्वशरीरेष्वेक इति
सर्वैः प्रयतेत ॥ ततश्च सर्वाण्येव शरीराणि युगपच्चालयेत् ॥ नानात्वे तु नायं दोष
इति ॥ इतश्च पुरुषभेद इत्याह ॥ त्रैगुण्यपर्ये ॥ तस्य विपर्ययोऽन्यथात्वं ॥ केचित् खलु स
त्वनिकायाः सत्त्वबहुला यथोर्ध्वस्रोतसः केचिद्रजोबहुला यथा मनुष्याः ॥ के
चित्तमोबहुला यथा तिर्यग्योनयः ॥ सोऽयमीदृशस्त्रैगुण्यविपर्ययोऽन्यथाभाव
स्तेषु सत्त्वनिकायेषु न भवेत् यद्येकः पुरुषः स्यात् ॥ भेदे त्वयं न दोष इति ॥ एवं पुरु

पदस्य २
विपर्ययाच्चैव ॥ एवकारो नि
त्रैगुण्यः सिद्धमित्यस्यार्थेन
रेकत्वं त्याः सिद्धमेवं नास्ति
त्रैयोगुणस्त्रैगुण्यं ६

त्रै॰ प॰ के

सांख्य

षवहुत्वं संपाद्य विवेकज्ञानोपयोगितया तस्य धर्मानाह ॥ तस्माच्च विपर्ययात्सि
द्धं साक्षित्वमस्य पुरुषस्य कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्तृभावश्च ॥ तस्माच्चे
ति । चः पुरुषबहुत्वेन सह धर्मान्तराणि समुच्चिनोति ॥ विपर्यासादित्युक्ते त्रैगु
ण्यविपर्यासादित्यनन्तरोक्तं संबध्येत ॥ च्युतस्तन्निरासाय तस्मादित्युक्तमनन्त
रोक्तं हि संनिधानादिदमो विषयो विप्रकृष्टं च तदिति (पुरुषबहुत्व) विप्रकृष्टं त्रिगुणमवि
वेकीत्यादि संबध्यते ॥ तस्मात्त्रिगुणादेर्यो विपर्ययासः पुरुषस्यात्रिगुणत्वं वि
वेकित्वं चाविषयत्वमसाधारणत्वं चेतनत्वं चाप्रसवधर्मित्वं च ॥ तत्र चेतनत्वेन
चाविषयत्वेन च साक्षित्वद्रष्टृत्वे दर्शिते । चेतनो हि द्रष्टा भवति नाचेतनः सा
दर्शितो विषयो यस्मै । क्षी च दर्शितविषयो भवति ॥ यस्मै प्रदर्श्यते विषयः स साक्षी ॥ यथा हि लोके र्थिप्र ३२

त्यर्थिनो विवादविषयं साक्षिणे दर्शयतः ॥ एवं प्रकृतिरपि स्वचरितं विषयं पुरुषा
य दर्शयतीति पुरुषः साक्षी ॥ न चाचेतनो विषयो वाशक्यो विषयं दर्शयितुमिति
चेतनत्वादविषयत्वाच्च भवति साक्षी ॥ अत एव द्रष्टापि भवति ॥ अत्रैगुण्याच्चास्य कै
वल्यं ॥ आत्यंतिको दुःखत्रयाभावः कैवल्यं ॥ तच्च तत्स्वाभाविकादेवात्रैगुण्यात्
॥ सुखदुःखमोहरहितत्वात्सि॰ ॥ अत एवात्रैगुण्याच्चास्य कैवल्यं ॥ आत्यंतिको दुः
खत्रयाभावः कैवल्यं ॥ तच्च तत्स्वाभाविकादेवात्रैगुण्यात् ॥ सुखदुःखमोहरहि
तत्वात्सिद्धं ॥ अत एवात्रैगुण्यान्माध्यस्थ्यं ॥ सुखी हि सुखे तृप्यन् ॥ दुःखी हि दुःखं
द्विषन् मध्यस्थो भवति ॥ तदुभयरहितस्तु मध्यस्थ इत्युदासीन इति चाख्यायते
विवेकित्वादप्रसवधर्मित्वाच्चाकर्तेति सिद्धं ॥ १९ ॥ स्यादेतत् ॥ प्रमाणेन कर्तव्यम

33

सोऽव्य...मवगम्यते तेनोऽहं चिकीर्षन् करोमीति ह्व तिश्चेतनत्वयोः ॥ सामानाधिकरण्यमनुभव
न्तोऽहं ॥ तदेतस्मिन्मते नावकल्पते चेतनस्य कर्तृत्वात् ॥ कर्तुश्चाचेतनत्वादित्यत आह ॥ त
स्मात्तत्संयोगादचेतनं चेतनावदिव लिंगं ॥ गुणकर्तृत्वे च तथा कर्त्तेव भवत्युदासीनः ॥
यतश्चैतन्यकर्तृत्वे भिन्नाधिकरणे युक्तितः सिद्धे तस्माद्भ्रांतिरियमित्यर्थः ॥ लिंगं
महदादिसूक्ष्मपर्यंतं वक्ष्यति ॥ भ्रांतिबीजं तत्संयोगस्तत्संनिधानमनिरोहितार्थम
न्यत् ॥ १९ ॥ तत्संयोगादित्युक्तं ॥ नच भिन्नयोः संयोगोऽपेक्षां विना ॥ नचेयमुपकार्यो
पकारकभावं विनेत्यपेक्षाहेतुमुपकारमाह ॥ पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधा
नस्य ॥ पंग्वंधवदुभयोरपि संयोगस्तत्कृतः सर्गः ॥ प्रधानस्येति कर्मणि षष्ठी ॥ प्रधान
स्य सर्वकारणस्य यद्दर्शनं पुरुषेण तदर्थं ॥ तदनेन भोग्यता प्रधानस्य दर्शिता ॥ तत

नेनसंति त्र ३
ः स्व त्रयं स्त्वान्य
ः कैवल्यं प्रार्थय

33A

स्य भोगं प्रधानं भोक्तारमंतरेण न संभवतीति युक्तास्य भोक्तुरपेक्षा ॥ पुरुषस्यापेक्षां
दर्शयति ॥ पुरुषस्य कैवल्या[illegible]र्थं [illegible]यां ॥ तच्च सत्त्वपुरुषान्यताख्याति [illegible]नि वंधनं ॥ न
च सत्त्वपुरुषान्यताख्यातिः प्रधानमंतरेणेति कैवल्यार्थं पुरुषः प्रधानमपेक्षते
॥ अनादित्वाच्च संयोगपरंपराया भोगाय संयुक्तोपि कैवल्याय पुनः संयुज्यत इति
युक्तं ॥ ननु भवत्वनयोः संयोगो महदादिसर्गस्तु कुतस्त्य इत्यत आह तत्कृतः स
र्गः ॥ संयोगो हि न महदादिसर्गमंतरेण ॥ भोगाय ॥ कैवल्याय च पर्याप्त इति संयोग ए
व भोगापवर्गार्थं सर्गं करोतीत्यर्थः ॥ २१ ॥ सर्गक्रममाह ॥ प्रकृतेर्महांस्ततोऽहंकार
स्तस्माद्गणश्च षोडशकः ॥ तस्मादपि षोडशकात्पंचभ्यः पंच भूतानि ॥ प्रकृतिरव्य
क्तं ॥ महदहंकारौ वक्ष्यमाणलक्षणौ ॥ एकादशेंद्रियाणि वक्ष्यमाणानि तन्मात्राणि

प्रधानस्य

प्रधानपुरुषयोः

समर्थः

३ का.के

34

सोऽहं...

व ॥ सोयं षोडशसंख्यापरिमितोगणः षोडशकः ॥ तस्मादपि षोडशकात्पंचभ्यस्तन्मा
त्रेभ्यः पंचभूतान्याकाशादीनि ॥ तत्रशब्दतन्मात्रादाकाशंशब्दगुणं ॥ शब्दतन्मात्रस
हितात्स्पर्शतन्मात्राद्वायुः शब्दस्पर्शगुणः ॥ शब्दस्पर्शतन्मात्रसहिताद्रूपतन्मा
त्रात्तेजः ॥ शब्दस्पर्शरूपगुणं ॥ शब्दस्पर्शरूपतन्मात्रसहिताद्रसतन्मात्रादापः ॥ शब्दस्प
र्शरूपरसगुणाः ॥ शब्दस्पर्शरूपरसतन्मात्रसहितागंधतन्मात्राच्छब्दस्पर्शरूप
रसगंधगुणापृथिवीजायत इत्यर्थः ॥ अव्यक्तसामान्यतोलिंगितंभपरिनमितं

महत्तत्वं २ विशेषतस्वमत्वंलघुप्रकाशकमित्यादिनाव्यक्तंसामान्यतोलिंगितंहेतुमदित्या
दिभिःप्रतिविवेकविज्ञानेपयोगितयाव्यक्तविशेषंबुद्धिंलक्षयति ॥ अध्यवसायोबु
द्धिः धर्मोज्ञानंविरागऐश्वर्यं ॥ सात्विकमेतद्रूपंतामसमस्माद्विपर्यस्तं ॥ अध्यव ३४

तद्विपरीतमित्यतेनाविशेषतस्वसत्वंलघुप्रकाशकमित्यादिनाव्यक्तंसामान्यतोलिंगितं
श्लोकेन ग्रंथेन महदादि

34A

सायो बुद्धिः क्रियाक्रियावतोरभेदविवक्षया ॥ सर्वो व्यवहर्त्ता आलोच्य मत्वा अहमत्राधि

अधिकारी शीली=

कृत इत्यभिमत्य कर्त्तव्यमेतन्मयेति अध्यवस्यति तत्श्च प्रवर्त्तत इति लोकसिद्धं ॥ तत्र

योयं कर्त्तव्यमिति विनिश्चयः चितिसन्निधानादापन्नचैतन्याया बुद्धेः ॥ सोध्यवसा

व्यापार= व्यापारः

योबुद्धेरसाधारणोव्यापारस्तदभेदाबुद्धिः ॥ स च बुद्धेर्लक्षणं समानासमानजाती

बुद्धेः=

यव्यवच्छेदकत्वात् ॥ तदेवं बुद्धिं लक्षयित्वा विवेकज्ञानोपयोगिनस्या धर्मान्सा

धर्मादेः=

त्विकतामसानाह ॥ धर्मो ज्ञानं विराग ऐश्वर्यं सात्त्विकमेतद्रूपं तामसमस्माद्विप

र्यस्तं धर्मोभ्युदयनिःश्रेयसहेतुः ॥ गुणपुरुषान्यताख्यातिर्ज्ञानं ॥ वैराग्यं राग

[illegible] भावः ॥ तस्य यतमानसंज्ञा व्यतिरेकसंज्ञा एकेंद्रियसंज्ञा वशीकारसंज्ञेति चतस्रः

संज्ञाः रागादयः कषायाश्चित्तवर्त्तिनः ॥ तैरिंद्रियाणि यथास्वं विषयेषु प्रवर्त्तन्ते

यागाद्यनुष्ठानजनितो धर्मोभ्युदयहेतुः अष्टांगयोगजनितो धर्मो निःश्रेयसहेतुः ॥ २ रागादिभिः १

रागः प्रतिबंधो विरागो ॥ २

कचित्पक्काः
को तस्मिन्सति२

सोऽस्म ... मात्रे प्रवर्त्तिनविषयेष्विं[illegible]द्रियाणीति तत्परिपाचनारंभः प्रयत्नो यतमानसंज्ञा
धरिपांवानुष्ठीयमाने केचित्कषायाः पक्काः रागादीनां पक्ष्यंते॥ केचित्तत्रैवं पूर्वापरीभावे सति
पक्ष्यमाणेभ्यः कषायेभ्यः पक्कानां व्यतिरेकेणावधारणं व्यतिरेकसंज्ञा॥ इंद्रिय
प्रवृत्त्यसमर्थतया पक्कानामौत्सुक्यमात्रेण मनसि व्यवस्थानमेकेंद्रियसंज्ञा॥ औ
त्सुक्यमात्रस्यापि निवृत्तिरुपस्थितेष्वपि दृष्टानुश्रविकविषयेषु या संज्ञात्रयात्परा सा
नासा वशीकारसंज्ञा॥ यामत्र भगवान्पतंजलिर्वर्णयांचकार॥ दृष्टानुश्रविकविष
यवितृष्णस्य वशीकारसंज्ञा वैराग्यमिति॥ सोयं बुद्धिधर्मो विराग इति॥ ऐश्वर्यमपि
बुद्धिधर्मो यतोऽणिमादि प्रादुर्भावः तत्राणिमा भवत्यणुः॥ लघिमा लघुभावः॥ य
तः सूर्यमरीचीनवलंब्य सूर्यलोकं याति॥ महिमा यतो महान्भवति॥ प्राप्तिरंगुल्यग्रे.

यतः शिलामपि प्रविशति+२

णस्थइशाति ॥ चं इमसं ॥ प्राकाम्यमिच्छानभिघातो भूमावुन्मज्जति निमज्जति ॥ यथोदके
वशित्वं भूतभौतिकं वशी भवत्यवश्यं ॥ ईशित्वं भूतभौतिकानां प्रभवव्यूहव्ययानामी
ष्टे यत्र कामावसायित्वं सत्यसंकल्पता यथास्य संकल्पो भवति भूतेषु तथैव भूता
अस्मादीनां विषयं
नि भवंति ॥ अन्येषां निश्चयानिश्चेतव्यमनुध्यायंते ॥ योगिनस्तु निश्चेतव्याः पदार्थं नि
श्चयमिति चत्वारः सात्त्विका बुद्धिधर्माः ॥ अधर्माज्ञानावैराग्यानैश्वर्याभिधानाश्चत्वा
रस्त्वर्थः ॥ अहंकारस्य लक्षणमाह ॥ अभिमानोऽहंकारस्तस्माद्द्विविधः प्रवर्त्तते स
र्गः ॥ एकादशकश्च गणस्तन्मात्रपंचकश्चैव ॥ अभिमानोऽहंकारः ॥ यत्तवल्वा लेवि
मतं च तत्राह ममाधिकृतः शाक्तः ॥ खल्वहमत्र मदर्था एवामी विषयाः मत्तो नान्यो
ऽधिकृतः कश्चिदस्ति ॥ अतोऽहमस्मीति योऽभिमानः सोऽसाधारणव्यापारत्वादहं

ता ॥ सा स्तु तद्विपरीता बुद्धिधर्माः ५

सांख्य

...कारः ॥ ननु पञ्चीवत्किं बुद्धिरध्यवस्यति ॥ कर्त्तव्यमेतन्मयेति तस्य कार्यभेदमाह ॥ न

अहंकारस्य

...भाद्विविधः प्रवर्त्तते सर्गः ॥ प्रकारद्वयमाह ॥ एकादशकश्चेति गणः इंद्रियाख्ययः ॥

तन्मात्रपंचकश्चैव द्विविध एव सर्गोऽहंकारान्नत्वन्यत इति एवेत्यनेनावधारयति

॥ स्यादेतत् ॥ अहंकारादेकरूपात् ॥ कारणात्कथं जडप्रकाशकौ गणौ भवत इत्यत

आह ॥ सात्विक एकादशकः प्रवर्त्तते वैकृतादहंकारात् ॥ भूतादेस्तन्मात्रः स तामस

तैजसादुभयं ॥ प्रकाशलाघवाभ्यामेकादशक इंद्रियगणः सात्विको वैकृतः ॥ सा

त्विकादहंकारात्प्रवर्त्तते ॥ भूतादेस्त्वहंकारात्तामसात्तन्मात्रो गणः ॥ प्रवर्त्तते कस्मा

त् ॥ यतः ॥ स तामसः ॥ ननु यदि सत्वतमोभ्यामेव सर्वकार्यं जन्यते ॥ तदा कृतमेकिं पार्थं२

चित्करेण रजसेत्यत आह ॥ तैजसादुभयं ॥ तैजसाद्राजसादुभयं गणद्वयं भवति ॥ य ३६

सात्विकतामसं१

तदुक्तं भवति । यद्यप्येको
हंकारस्तथापि गुणभेदे
देवात्रिभेदान्यद्भिन्नकार्यं
करोतीति २

36A

सात्विको
तोहंकारः ५

द्यपिरजसोनकार्यंनरमस्तितथापिसत्वतमसीस्वयमक्रियेसमर्थेऽपिनकार्यं
कुरुतः रजस्तुचलतयायदाचालयतितदास्वकार्यंकुरुतइति॥तदुभयस्मिन्नपि
कार्येसत्वतमसोःक्रियोत्पादनद्वारेणास्तिरजसःकारणत्वमितिनव्यर्थंरजइति॥सा
त्विकमेकादशकमाख्यातं॥वाह्येंद्रियदशकंनावदाह॥बुद्धींद्रियाणिचक्षुःश्रोत्रघ्राण
रसनत्वगाख्यानि॥वाक्पाणिपादपायूपस्थाख्यकर्मेंद्रियाण्याहुः॥सात्विकाहंकारो
पादानत्वमिंद्रियत्वं॥तच्चद्विविधं॥बुद्धींद्रियंकर्मेंद्रियंच॥उभयमप्येतदिंद्रस्यात्म
नःचिह्नत्वादिंद्रियमुच्यते॥तानिचस्वसंज्ञाभिश्चक्षुरादिभिरुक्तानि॥तत्ररूपग्रह
णलिंगंचक्षुः शब्दग्रहणलिंगंश्रोत्रंगंधग्रहणलिंगंघ्राणं॥रसग्रहणलिंगंरसनं
स्पर्शग्रहणलिंगंत्वक्॥वागादीनांकार्यंवक्ष्यति॥एकादशमिंद्रियमाह॥उभयात्मक

मनः संकल्पकमिंद्रियं च साधर्म्यात् ॥ गुणपरिणामविशेषात् ॥ नानात्वं बाह्यभे
सोऽस्य दाश्च ॥ एकादशस्विंद्रियेषु मध्ये मन उभयात्मकं ॥ बुद्धींद्रियं कर्मेंद्रियं च चक्षुरादी
नां वागादीनां च मनोधिष्ठितानां स्वविषयेषु प्रवृत्तेः ॥ तत्व साधारणेन रूपेणाल
क्षयति ॥ संकल्पकमत्र मनः ॥ आलोचितमिंद्रियेण वस्त्विदमिति संमुग्धमिदमे
वं नैवमिति संम्यक् कल्पयति विशेषणविशेष्यभावेन विवेचयतीति यावत् ॥ य
दाहुः ॥ संमुग्धं वस्तुमात्रं तु प्राग्गृह्णात्यविकल्पितं ॥ तत्सामान्यविशेषाभ्यां कल्पयं
ति मनीषिणः ॥ तथाहि ॥ अस्ति ह्यालोचनज्ञानं प्रथमं निर्विकल्पकं ॥ बालमूकादि
विज्ञानसदृशं शुद्धवस्तुजमिति ॥ ततः परं पुनर्वस्तु धर्मैर्जात्यादिभिर्यया ॥ बुध्या इंद्रियाणां मनस्त्वं १
वसीयते सापि प्रत्यक्षत्वेन संमता ॥ सोयं संकल्पलक्षणो व्यापारो मनसः सर्वं नास ३७

37A

मानज्ञानीयाभ्यां व्यवछिन्नं मनो लक्षयति॥ स्यादेतत्॥ असाधारणव्यापारयोगिनौ
यथा महदहंकारौ नेंद्रियं एवं मनोप्यसाधारणव्यापारं नेंद्रियं भवितुमर्हतीत्य
त आह॥ इंद्रियं च कुतः साधर्म्यात्॥ इंद्रियांतरैः सात्त्विकाहंकारोपादानत्वं च सा
धर्म्यं न त्विंद्रलिंगत्वं संघातपरार्थत्वादीनामप्यात्मलिंगत्वेनेंद्रियत्वप्रसंगात्॥ तस्मा
द्व्युत्पत्तिमात्रमिंद्रलिंगत्वं न तु प्रवृत्तिनिमित्तं॥ अथ कथं सात्त्विकादेकस्मादहंकारादेकादशें
द्रियाणीत्यत आह॥ गुणपरिणामविशेषान्नानात्वं बाह्यभेदाश्च॥ शब्दाद्युपभोगसंवर्त्तका
दृष्टसहकारिभेदात्कार्यभेदः॥ अदृष्टभेदोपि गुणपरिणाम एव बाह्यभेदाश्चेति नि
दर्शनार्थं यथा बाह्यभेदास्तथैतदपीत्यर्थः॥ तदेवमेकादशेंद्रियाणि स्वरूपतोभिधा
यैषामसाधारणीर्वृत्तीराह॥ शब्दादिषु पंचानामालोचनमात्रमिष्यते वृत्तिः॥ बुद्धींद्रि

वचनादानविहरणोत्सर्गानंदाश्च पंचानां॥

(interlinear glosses: प्रतिपादक; इंद्रियभेद; नानात्वं; अदृष्टः परिणामः इंद्रि॰ गुणवाचि)

[illegible]ग संमुग्धवस्तुदर्शनं वालोचनमुक्तं ॥ वचनादानविहरणोत्सर्गानंदाख्यपंचानां क
सो[illegible] [illegible]न्द्रियाणां ॥ कंठताल्वादिस्थानमिंद्रियं वाक् ॥ (वाचः) तस्या वृत्तिर्वचनं ॥ स्पष्टमन्यत् ॥ अंत
ष्करणत्रयवृत्तिमाह ॥ स्वालक्षण्यं (स्वालक्षण्य) वृत्तिस्त्रयस्य सैषा भवत्यसामान्या ॥ सामान्यकरण
वृत्तिः प्राणाद्या वायवः पंच ॥ २९ ॥ स्वमसाधारणं लक्षणं येषां तानि स्वलक्षणानि महद
हंकारमनांसि तेषां भावः स्वालक्षण्यं ॥ तच्च स्वानि लक्षणानि ॥ तद्यथा ॥ महतोऽध्य
वसायोऽहंकारस्याभिमानः ॥ संकल्पो मनसो वृत्तिः व्यापारः ॥ वृत्तिर्द्वैविध्यं साधारण
त्वासाधारणत्वाभ्यामाह ॥ सैषा भवत्यसामान्याऽसाधारणी ॥ सामान्यकरणवृत्तिः
[illegible]यूनांभावेमहदादीनां [illegible]नावीत२१ प्राणाद्या वायवः पंच ॥ सामान्या चासौ करणवृत्तिश्चेति (महदहंकारमनसां) त्रयाणामपि करणानां पंच
वायवः जीवनवृत्तिः ॥ तद्भावे भावात् ॥ तदभावे चाभावात् ॥ तत्र प्राणो नासाग्र ३८

38A

त्रयम्बी स्पो॰ ३ पातञ्जलवृ॰ १

न्नाभि पादांगुष्ठ वृत्तिः अपानः कृकाटिका पृष्ठ पाद पार्ष्णि वृत्तिः ॥ समानो हृन्नाभि
सर्वसंधि वृत्तिः ॥ उदानो हृत्कंठतालु मूर्द्धभ्रू मध्य वृत्तिः व्यानस्त्वग्वृत्ति रिति पंच
वायवः ॥ असाधारणीषु वृत्तिषु क्रमाक्रमो प्रकारावाह ॥ युगपच्चतुष्टयस्य तु वृत्तिः
क्रमशश्च तस्य निर्दिष्टा ॥ दृष्टे तथा प्यदृष्टे त्रयस्य तत्पूर्विका वृत्तिः दृष्टे पथा संतमस
सांधकारे विद्युत्संपात मात्राद्या घ्रमभिमुखमतिसंनिहितं पश्यति ॥ तदा खल्वस्या
लोचन विकल्पाभिमानाध्यवसाया युगपदेव प्रादुर्भवंति ॥ यत स्तत उत्प्लुत्य स्थाना
नादेकपदे ऽपसरति क्रमशश्च यदा मंदालोके प्रथमं तावद स्फुटमावैसुग्धमालोच
यति ॥ अथ प्रणिहितमनाः ॥ कर्णातारुष्ट सज्जार त्रिं जिनीमंडलीकृत कोदंडः
चैवेंडनरः पांट च्चैरायमिति निश्चिनोति ॥ अथ वमां प्रत्येतीत्यभिमन्यते ॥ अथा

...वस्यति अप्रमत्तामीतः स्यानादिति ॥ परोक्षे तु त्रयस्य वाह्येंद्रियवर्जं वृत्तिरित्या

सांख्य... ह ॥ अदृष्टे त्रयस्य तत्पूर्विकावृत्तिः ॥ अंतष्करणत्रयस्य युगपत्क्रमेण च वृत्तिर्दृष्टे

तत्र दृष्टे र्वेयस्यांसा

पूर्विकेति ॥ अनुमानागमस्मृतयो ... परोक्षेर्थे दर्शनपूर्वाः प्रवर्त्तंते नान्यथा ॥ य

था दृष्टे तथाऽदृष्टेपीति योजनास्यादेतत् ॥ चतुर्णां त्रयाणां वा वृत्तयो नर्त्तवन्माधी

नाः तेषां सदातनत्वेन वृत्तीनां सदोत्पादप्रसंगात् ॥ आकस्मिकत्वे तु वृत्तिसंक

रप्रसंगोऽनियमहेतोरभावादित्यतः आह ॥ स्वां स्वां प्रतिपद्यंते परस्पराकूतंम

गम्यान्यतमः प्रवर्त्तते ॥ प्रवर्त्तमानः शाक्तीकः शक्तिमेवादत्तेन यष्ट्यादिकमेवं

यष्टीकोपि यष्टिमेव न शाक्त्यादिकं ॥ तथाऽन्यतमस्य करणस्याकूतात् स्वकार्यक

करणस्य

रणाभिमुखवादन्यतमं करणं प्रवर्त्तते ॥ तस्य वृत्ते स्वहेतुमत्वान्न वृत्तिसंकरस्तु कं ३९

परस्परेणाकूतोऽभिप्रायोहेतुं कारणं यस्याः सा तां ॥

प्रसिद्ध हेतुकां वृत्तिं पुरुषार्थ... हेतुर्न केनचित्कार्यं... करणं ॥ ...करण... नीतिकोषः ... यष्टिव... हेवः पुरुषाः ... श्रीको धानुष्क कापी कोः ... तस्य केतोः ... संकरपद ... तः ॥ तत्र ... तमस्याकूतेन दि

39A

स्वां स्वां प्रतिपद्यंते इति स्यादेतत् ॥ याष्टीकादयश्चेतनत्वात् ॥ परस्पराकूतमवगम्य
प्रवर्त्तंत इति युक्तं॰ करणानि त्वचेतनानि तस्मान्नैवं प्रवर्त्तितुमर्हंति ॥ तेनैषा
मधिष्ठात्रा करणानां स्वरूपसामर्थ्योपभोगाभिज्ञेन भवितव्यमत आह ॥ पुरुषा
र्थ एव हेतुर्न केनचित्कार्यते करणं ॥ भोगापवर्गलक्षणः पुरुषार्थ एवानागता
वस्थः ॥ प्रवर्त्तयति करणानि ॥ कृतमत्र तत्स्वरूपाभिज्ञेन कर्त्रा ॥ एतच्च वत्स
विवृद्धिनिमित्तमित्यत्रोपपादयिष्यते ॥ ३१ ॥ न केनचित्कार्यते करणमित्युक्तं
तत्र करणं विभजते करणं त्रयोदशविधं तदाहरणधारणप्रकाशकरं ॥ कार्यं च तस्य दश
धाहार्यं धार्यं प्रकाश्यं च ॥ करणं त्रयोदशविधं ॥ इंद्रियाण्येकादश बुद्धिरहंकार
श्चेति ॥ त्रयोदशप्रकारं करणं कारकविशेषः करणं॰ न च व्यापारावेशं विनाका

क्रियासंबंधं विना कारकत्वं न ।

40

सांख्य॰ ४०

रकत्वमिति व्यापारमाह ॥ तदिति यथा यथं तत्र कर्मेन्द्रियाणि वागादीन्याहरंति ·
यथा स्वमुपाददते ॥ स्वव्यापारेण व्याप्नुवंतीति यावत् ॥ बुद्ध्यहंकारमनांसि तु स्व
वृत्त्या प्राणादिलक्षणया धारयंति बुद्धीन्द्रियाणि प्रकाशयंति धारणादि क्रिया
णां सकर्मकतया किं कर्म कतिविधं चेत्यत आह · कार्यं च तस्य त्रयोदशविध
स्य करणस्य दशधा आहार्यं धार्यं प्रकाश्यं च ॥ आहार्यं व्याप्यं ॥ कर्मेन्द्रिया
णां वचनादान विहरणोत्सर्गानंदाः ते यथा यथं व्याप्याः ॥ ते च यथा यथं दिव्यादिव्यतया द
श एवं धार्यमप्यंतःकरणत्रयस्य प्राणादिलक्षणया हत्त्या शरीरं तच्च पार्थिवा
दि पांचभौतिकं ॥ शब्दादीनां पंचानां समूहः पृथिवीति · ते च पंच दिव्यादिव्यतया दश
ति धार्यमपि दशधा · एवं बुद्धीन्द्रियाणां प्रकाश्यमपि दशधेति ॥ त्रयोदशविधेक ४०

शब्दस्पर्शरूपरसगं... यथायथं व्याप्याः। ते च यथायथं दि... दिव्यतयादशेति +१

(margin notes: शरीरादिके = ; शरीरादि ; शरीरस्य ; तितस्य ; बुद्ध्यहंकारमनसः ; व्याहार्यं दशधा वा ; दिवार)

40A

ततो ऽवांतरविभागं करोति॥ अंतःकरणं त्रिविधं दशधा बाह्यं त्रयस्य विषयाख्यं॥ सां
प्रतकालं बाह्यं त्रिकालमाभ्यंतरं करणं॥ अंतःकरणं बुद्धिरहंकारो मन इति त्रि
(त्रिविधं)
राभ्यंतरवृत्तित्वादंतःकरणं॥ दशधा बाह्यमिंद्रियं॥ त्रयस्यांतःकरणस्य विषया
ख्यं विषयमाख्यातीति॥ विषयसंकल्पाभिमानाध्यवसायेषु कर्त्तव्येषु द्वारीभवति
(विषयाख्यं)
॥ तत्र बुद्धींद्रियाण्यालोचनेन कर्मेन्द्रियाणि तु यथास्वं व्यापारेण॥ बाह्यांतरयो
करणयोर्विशेषांतरमाह॥ सांप्रतकालं बाह्यं॥ त्रिकालमाभ्यंतरं करणं॥ सांप्रतका
लं वर्त्तमानकालं बाह्यमिंद्रियं वर्त्तमानसमीपमनागतमपि वर्त्तमानं॥ अतो वागपि
वर्त्तमानकालविषया भवति॥ त्रिकालमाभ्यंतरं करणं॥ तद्यथा॥ नदीपूरभेदादभू
द्वृष्टिः॥ अस्ति धूमादग्निरिह नगनिकुंजे॥ असत्युपघातके नेति सांख्याचार्याः॥ त कालः१

पिपीलिकांडसंचरणाद्भविष्यति वृष्टिरिति।तदनुरूपान्संकल्पाभिमानाध्यवसाया भवंति।कालश्च वैशेषिकमते एको नानागतादिव्यवहारभेदं प्रवर्त्तयितुमर्हतीति तस्माद्यं येरूपा
देरनागतादिभेदं प्रपद्यते सत्त्वतरवोपाधयोऽनागतादिव्यवहारहेतवः केतमत्रांतर्गत इतुना काले+१

सां॰ कौ॰

४१

षाविशे॰+२

स्मात्तत्कालरूपत्वांतराभ्युपगमइति॥सांप्रतकालानां वाह्येंद्रियाणां विषयं विवे
चयति॥बुद्धींद्रियाणि तेषां पंच विशेषाविशेषविषयाणि वाग्भवति शब्दविष
याविशेषाणि पंच विषयाणि॥तेषां दशानां इंद्रियाणां मध्ये पंच विशेषविषयाणि
विशेषाः स्थूलाः शब्दादयः शांतघोरमूढाः पृथिव्यादिरूपाः अविशेषास्तन्मा
त्राणि सूक्ष्मादयः॥मात्रग्रहणेन भूतभावमपाकरोति॥विशेषाश्चाविशेषाश्च
विशेषाविशेषास्त एव विषया येषां बुद्धींद्रियाणां तानि तथोक्तानि॥तत्रोर्द्ध्वस्रो
तसां योगिनां च श्रोत्रं शब्दतन्मात्रविषयं स्थूलशब्दविषयं च॥अस्मदादीनां च
स्थूलशब्दविषयमेव॥एवं तेषां त्वक् स्थूलसूक्ष्मस्पर्शविषया॥अस्मदादीनां तु
स्थूलस्पर्शविषयैव॥एवं चक्षुरादयोपि तेषामस्मदादीनां च रूपादिषु स्थूलसू ४१

स्थूलभावे

देवानां

51A

तन्मात्रे... तेन रद्वारमि सीतिद्धं

न्मेषु हस्वयाः एवं कर्मेंद्रियेषु मध्ये वाग्भवति ॥ शब्दविषया स्थूलशब्दविषय
तद्धेतुत्वात् ननु शब्दतन्मात्रस्य हेतुः ॥ तस्याहंकारिकत्वेन वागिंद्रियेण सहे
ककरणत्वात् ॥ शेषाणि तु चत्वारि पायूपस्थपाणिपादाख्यानि पंच विषयाणि
पाणिपाद्याहार्याणां घटादीनां पंचशब्दाद्यात्मकत्वादिति ॥ सांप्रतं त्रयोदशसु
मनोहंकाराभ्यां सहवर्तमाना
करणेषु केषांचिद्गुणभावं केषांचित्प्रधानभावं सहेतुमाह· सांतःकरणा बुद्धिः
सर्वं विषयमवगाहते यस्मात् ॥ तस्मात्त्रिविधं करणं द्वारि द्वाराणि शेषाणि ॥ द्वारि
प्रधानं शेषाणि करणानि बाह्येंद्रियाणि द्वाराणि द्वारैः तैरुपनीतं विषयं समनोऽहं
कारा बुद्धिः ॥ यस्मादवगाहतेऽध्यवस्यति ॥ तस्माद्बाह्यानींद्रियाणि द्वाराणि द्वा
रवती च सांतःकरणा बुद्धिरिति ॥ न केवलं बाह्यानींद्रियाण्यपेक्ष्य प्रधानं बु
बुद्धिः

42

सांख्य० द्विरयितुये त्वप्यहंकारमनसी द्वाराणि ते त्वपेक्ष्य बुद्धिः प्रधानमित्याह॥ एते प्र
दीपकल्पाः परस्परविलक्षणा गुणविशेषाः॥ कृत्स्नं पुरुषस्यार्थं प्रकाश्य बु
४२ द्धौ प्रयच्छंति॥ यथा ग्रामाध्यक्षाः कौटुंबिकेभ्यः करमादाय विषयाध्यक्षाय प्र
यच्छंति विषयाध्यक्षश्च सर्वाध्यक्षाय। सर्वभूपतये। तथा बाह्येंद्रियाण्यालो
च्य मनसे समर्पयंति। मनश्च संकल्प्याहंकाराय। अहंकारश्चाभिमत्य बु
द्धौ सर्वाध्यक्ष॥ तदिदमुक्तं॥ पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छंतीति बाह्येंद्रिय
मनोहंकाराश्च गुणविशेषाः॥ गुणविशेषाः॥ गुणानां सत्त्वरजस्तमसां वि
काराः ते तु परस्परविरोधशीला अपि पुरुषार्थेन भोगापवर्गरूपेण एकवाक्य
तां नीताः॥ यथा वर्त्तितैलवह्नयः संतमसापनयेन रूपप्रकाशाय मिलिताः ४२

42A

प्रदीपः॥ एवमेते गुणविशेषा इति योजना॥ ३६॥ कस्मात्पुनर्बुद्धौ प्रयच्छंति नतु
बुद्धिरहंकारायद्वारिणे मनसे वेत्यत आह॥ सर्वं प्रत्युपभोगं यस्मात्पुरुषस्य
साधयति बुद्धिः॥ सैव च विशिनष्टि पुनः प्रधानपुरुषांतरं सूक्ष्मं॥ पुरुषार्थ
प्रेरकत्वात्पुरुषार्थस्य पुरुषार्थस्य
स्य प्रयोजकत्वात् तस्य यत्साक्षात्साधनं तत्प्रधानं बुद्धिश्चास्य साक्षात्सा
धनं॰ तस्मात्सैव प्रधानं॥ यथा सर्वाध्यक्षः साक्षाद्राजार्थसाधनं तथा प्रधानं
प्रधाने
॥इतरे तु ग्रामाध्यक्षादयः॥ तं प्रति गुणभूताः॥ बुद्धिर्हि पुरुषसन्निधानात्तत्
पुरुष: पुरुषरूपेव
छायापत्त्या तद्रूपेव सर्वं विषयोपभोगं पुरुषस्य साधयति॥ सुखदुःखादु
भवो हि भोगः स च बुद्धौ बुद्धिश्च पुरुषरूपेवेति पुरुषमुपभोजयति॰ यथा
थीलोचनसंकल्पाभिमानाश्च तत्तद्रूपपरिणामेन बुद्धावुपसंक्रांताः॥ तथा

ध्य 93

सांख्य॰ इंद्रियादिव्यापारा अपि बुद्धेरेव स्वव्यापारेण अध्यवसायेन सह व्यापारीभवंति॰ यथा स्व
सैन्येन सह ग्रामाहंत्वादि सैन्यं सर्वाध्यक्षस्य भवति ॥ सर्वं शब्दादिकं प्रतियउपभोगः पु
४३ रुषस्य तं साधयति॰ पश्चात्प्रधानपुरुषयोरंतरं विशेषं विशिनष्टि॰ करोति॰ यथौदन
पाकं पचतीति करणं च प्राप्तपादनं अनेनाऽपवर्गः पुरुषार्थो दर्शितः नदेवं करणा
नि विभज्य विशेषाविशेषान् विभजते॰ ॥ तन्मात्राण्यविशेषास्तेभ्यो भूतानि पंचभ्यः
॥ एते स्मृता विशेषाः शांता घोराश्च मूढाश्च ॥ शब्दादितन्मात्राणि सूक्ष्माणि न चैषां शां
तादि स्तु उपभोगयोग्यो विशेष इति मात्रशब्दार्थः ॥ अविशेषानुक्त्वा विशेषान्वक्तुमु
त्पत्तिमेषामाह॰ तेभ्यः तन्मात्रेभ्यः यथासंख्यमेकद्वित्रिचतुःपंचभ्यः आकाशानि
लाऽनिलसलिलावनिरूपाणि पंच॰ पंचभ्यस्तन्मात्रेभ्यः अस्त्वेषां भूतानामुत्पत्तिः ४३

43A

वे१ विशेषं किमायातमित्यत आह॥ एते स्मृता विशेषाः॥ कुतः॥ शांता घोराश्च मूढाश्च
चएको हेतौ द्वितीयः समुच्चये॥ यस्मादाकाशादिषु स्थूलेषु सत्वप्रधानतया केचि तराः२
च्छांताः सुखाः प्रसन्नाः लघवः॥ केचिद्रजः प्रधानतया घोरा दुःखाः अनवस्थि
ताः॥ केचित्तमः प्रधानतया विषण्णा गुरवः॥ ततोऽमी परस्परव्यावृत्त्याऽनुभूयमा
ना विशेषा इति स्थूला इति चोच्यंते॥ तन्मात्राणि तु अस्मदादिभिः परस्परव्यावृत्ता
नि नानुभूयंत इत्यविशेषा इति सूक्ष्मा चोच्यंते॥ ३८॥ विशेषाणामवांतरविशे
षव्यापारमाह॥ सूक्ष्मामातापितृजाः सह प्रभूतैस्त्रिधा विशेषाः स्युः सूक्ष्मास्तेषां
नियता मातापितृजा निवर्त्तंते॥ त्रिविधा विशेषाः स्युः॥ तान् विशेषप्रकारानाह॥
सूक्ष्मा मातापितृजाः॥ सह प्रभूतैः सूक्ष्माः सूक्ष्मदेहाः मातापितृजाः॥ षाट्कौशिकाः

रचिताः१ परिकल्पिता१

सांख्य० निवृत्तानि २ ४४ 44

तत्र मातृतो लोमलोहितमांसानि पितृतः स्नाय्वस्थिमज्जान इति षट्कोशाः ॥ प्रक
श्यानि महान्ति भूतानि तैः सह शरीरं एको विशेषः ॥ मातापितृजो द्वितीयः ॥ महाभूत
वर्गे च घटादीनां निवेश इति सूक्ष्म मातापितृजयोर्द्वयोर्विशेषमाह ॥ सूक्ष्मास्ते
षां विशेषाणां मध्ये ये ते नियताः मातापितृजाः निवर्तन्ते रसांता वा भस्मांता वा वि
ड्ंता वेति सूक्ष्मशरीरं विभजते ॥ पूर्वोत्पन्नमसक्तं नियतं महदादिसूक्ष्मपर्यन्तं ।
संसरति निरुपभोगं भावैरधिवासितं लिंगं ॥ प्रधानेनादिसर्गे ॥ प्रति पुरुषमेकैकमु
त्पादितं असक्तं ॥ अव्याहतं शिलामप्यनुविशति ॥ नियतं ॥ आ चादिसर्गाच्च महाप्रल
याद्भवतिष्ठते ॥ महदादि सूक्ष्मपर्यन्तं महदहंकारैकादशेन्द्रियपंचतन्मात्रपर्यन्तं ॥
एषां समुदायः सूक्ष्मशरीरं ॥ शान्तघोरमूढैरिन्द्रियैरन्वितत्वाद्विशेषः ॥ नन्वस्तु तदेव ४४

44A

शरीरंभोगायतनंपुरुषस्य कृतं ह्युपमानेनषाट्कौशिके नशरीरेणेत्यत आह· संस
रतीति उपात्तमुपात्तंषाट्कौशिकंशरीरं जहाति· हायंहायंचोपादत्ते·कस्मात्॥ नि
रुपभोगंयतः॥ षाट्कौशिकं विनासूक्ष्मंशरीरंनिरुपभोगंयस्मात्तस्मात्संसरति·
ननुधर्माधर्मनिमित्तः संसारः नचसूक्ष्मशरीरस्यास्तितद्योगः॥ तत्कथंसंसरती
त्यत आह॥ भावैरधिवासितं यथासुरभिचंपकसंपर्काद्वस्त्रंतदामोदवासितंभवति
॥तस्माद्भावैरेवाधिवासितत्वात्॥ संसरति॥ कस्मात्पुनः प्रधानमिवमहाप्रलयेपि
तच्छरीरंनतिष्ठतीत्यत आह· लिंगं॥ लयंगच्छतीतिलिंगं॥ हेतुमत्त्वेनचास्यलिंगत्व
मितिभावः॥ ४०॥ स्यादेतत्॥ बुद्धिरेवसाहंकारेंद्रियाकस्मान्नसंसरति॥ कृतंसूक्ष्म
शरीरेणाप्रामाणिकेनेत्यत आह· चित्रंयथाश्रयमृतेस्थाण्वादिभ्यो विनायथा

धर्माधर्मतोनानानेवैरा ग्यादैराग्यज्ञानेश्वर्याणा लिंभावास्तदन्वितोबुद्धिः नदन्वितंचसूक्ष्मशरीरं इतितदधिभावैरधिवा सितं ५

सांख्य० ४५ 45

काया॥ नह्यहिना विशेषेर्णे तिष्ठति निराश्रयं लिंगं॥ लिंगनात् ज्ञापनात्॥ बुद्ध्यादयो
लिंगं तदनाश्रितं नतिष्ठति॥ जन्ममरणयोरंतराले बुद्ध्यादयः॥ प्रत्युत्पन्नशरीराश्रिताः
॥ प्रत्युत्पन्नपंचतन्मात्रत्वे सति बुद्ध्यादित्वात्॥ दृश्यमानशरीरवृत्ति बुद्ध्यादिवत्॥ दि
नाविशेषैरिति सूक्ष्मैः शरीरैरित्यर्थः॥ आगमश्चात्र भवति॥ अंगुष्ठमात्रं पुरुषं नि
श्चकर्ष यमो बलादिति॥ अंगुष्ठमात्रेण सूक्ष्मतामुपलक्षयति॥ आत्मनो निष्कर्षासंभ
वेन सूक्ष्ममेव शरीरं पुरुषः॥ तदपि हि पुरि स्थूले शरीरे शेते इति॥ ४१॥ एवं सूक्ष्मशरी
रास्तित्वमुपपाद्य यथा संसरति येन हेतुना तदुभयमाह॥ पुरुषार्थहेतुकमिदं
निमित्तनैमित्तिकप्रसंगेन॥ प्रकृतेर्विभुत्वयोगान्नटवद्व्यवतिष्ठते लिंगं॥ पुरुषार्थेन
हेतुना प्रयुक्तं निमित्तं धर्माधर्मादि नैमित्तिकं तेषु तेषु निकायेषु षाट्कौशिकशरीर ४५

45A

ग्रहः ॥ सद्धिर्धर्मादिनिमित्तप्रभवः ॥ निमित्तं च नैमित्तिकं च ॥ तत्र यः सर्गः पुर्ष्टिः प्र
सक्तिः तया नटवद्यवति स्वते लिंगं ॥ सूक्ष्मशरीरं ॥ यथाहि ॥ नटस्तांतां भूमिकां
विधाय रामो वा ऽज्ञानशत्रुर्वा वत्सराजो वा भवति । एवं तत्र स्थूलशरीरग्रहणाद्दे
वो मनुष्यो वा पशुर्वा भवति वनस्पतिर्वा सूक्ष्मं शरीरमित्यर्थः ॥ कुतस्त्यः पुनर
स्य हृत्त्वा महिमेत्यत आह । प्रकृतेर्विभुत्वयोगात् ॥ तथा च पुराणे ॥ विश्वरूप्यात्प्र
धानस्य परिणामोऽयमद्भुतः इति ॥ ४२ ॥ निमित्तनैमित्तिकप्रसंगेनेत्युक्तं तत्र निमित्तिकं निमि॰नै॰४
च विभजते ॥ सांसिद्धिकाश्च भावाः प्राकृतिका वैकृताश्च धर्माद्याः ॥ दृष्टाः करणाश्र
यिणः कार्याश्रयिणश्च कललाद्याः वैकृतिका नैमित्तिकाः प्राकृतिकाः सांसिद्धिकाः कि२
सांसाविकाइतियावत् सांसिद्धिः ॥ तथाहि ॥ सर्गादावादिविद्वान् भगवान् कपिलो महामुनिर्धर्म
प्र२

सांख्य. ज्ञानवैराग्यैश्वर्यसंपन्नः प्रादुर्बभूवेति स्मरंति ॥ वैकृताश्च भावाः असांसिद्धिकाः ॥ उ
पायादनुष्ठानोत्पन्नाः यथा प्राचेतसप्रभृतीनां महर्षीणामेवमधर्माज्ञानवैराग्यै
४६ नैश्वर्याण्यपि कार्याश्रितशरीरं नदाश्रयिणस्तस्यावस्थाः कललबुद्बुदमांसपेशीकंडरां २३
स्व४ प्रत्यंगव्यूहा गर्भस्य ततो निर्गतस्य बालस्य बाल्यकौमारयौवनवार्द्धकानीति ॥ ४
46 ३ ॥ अवगतानि निमित्तानि नैमित्तिकानि कतमस्य तु निमित्तस्य कतमन्नैमित्तिकमि
त्यत आह ॥ धर्मेण गमनमूर्ध्वं गमनमधस्ताद्भवत्यधर्मेण ॥ ज्ञानेन चापवर्गो विपर्य
यादिष्यते बंधः ॥ धर्मेण गमनमूर्ध्वं द्युःप्रभृतिषु लोकेषु ॥ गमनमधस्ताद्भवत्यध
र्मेण ॥ सुतलादिषु ॥ ज्ञानेन चापवर्गः ॥ तावदेव प्रकृतिरारभते ॥ न यावद्विवेकख्या
तिं करोति ॥ अथ विवेकख्यातौ सत्यां कृतकृत्यतया विवेकविवेकख्यातिमंतं पु ४६

46A

रुषं प्रति निवर्त्तते ॥ यदाहुः ॥ विवेकख्यातिपर्यंतं याति प्रकृतिचेष्टितमिति ॥ वि
प्रकृतिः
पर्ययात् तत्त्वज्ञानादिष्यते बंधः ॥ स च त्रिविधः प्राकृतिको वैकृतिको दाक्षिण
श्चेति ॥ तत्र प्रकृतावात्मज्ञानात् ॥ ये प्रकृतिमुपासते तेषां प्राकृतो बंधः ॥ यो बंधः
पुराणे प्रकृतिलयास्त्वनुच्यते ॥ पूर्णं शतं सहस्रं तु तिष्ठंत्यव्यक्तचिंतका इति ॥ वै
कारिको बंधस्तेषां ये विकारानेव भूतेंद्रियाहंकारबुद्धीरुपासते ॥ पुरुषबुद्ध्यो
पासते तान् प्रतीदमुच्यते ॥ दश मन्वंतराणीह तिष्ठंतींद्रियचिंतकाः ॥ भौतिका
स्तु शतं पूर्णं सहस्रं त्वाभिमानिकाः ॥ बौद्धा दश सहस्राणि तिष्ठंति विगतज्वराः
॥ ते खल्वमी विदेहा येषां वैकृतो बंधः इति ॥ इष्टापूर्तेन दाक्षिणः ॥ पुरुषतत्त्वान
भिज्ञो हि इष्टापूर्तकारी कामोपहतमना बध्यत इति ॥ ४४ ॥ वैराग्यात्प्रकृतिलयः

सांख्य. संसारो भवति राजसाद्रागात् ॥ ऐश्वर्यादभिघातो विपर्ययात्तद्विपर्यासः ॥ वैराग्यात्प्र
कृतिलयः ॥ पुरुषतत्त्वानभिज्ञस्य वैराग्यमात्रात्प्रकृतिलयः ॥ प्रकृतिग्रहणेन प्र
४७ कृतिमहदहंकारभूतेंद्रियाणि गृह्यन्ते ॥ तेष्वात्मबुद्ध्या उपास्यमानेषु लयः ॥ संसा
47 रो भवति राजसाद्रागात् ॥ राजसादित्यनेन राजसो दुःखत्वात् ॥ संसारस्य दुःखता
सूचिता ॥ ऐश्वर्यादविघातः ॥ इच्छाया ईश्वरो हि यदिच्छति तत्करोति विपर्ययादनै
श्वर्यात् ॥ तद्विपर्यासः सर्वेच्छाविघात इत्यर्थः ॥ ४५ ॥ बुद्धिधर्मान्धर्मादीनष्टौ भा
वान् ॥ समासव्यासाभ्यां मुमुक्षूणां हेयोपादेयान्दर्शयितुं प्रथमं तत्तावत्समा
प्रत्ययसर्गस्य
समाह ॥ एष प्रत्ययसर्गो विपर्ययाशक्तितुष्टिसिद्ध्याख्यः गुणवैषम्यविमर्दात्तस्य च भेदा
स्तु पंचाशत् ॥ एष इति ॥ प्रतीयतेऽनेनेति बुद्धिः प्रत्ययस्तस्य सर्गः ॥ तत्र विपर्ययोऽ ४७
प्रत्ययो१

47A

ज्ञानमविद्यासा बुद्धिधर्म्मः ॥ अशक्तिरपि करणवैकल्यहेतु(का) बुद्धिधर्म एव ॥ तुष्टि
सिद्धी अपि वक्ष्यमाणे बुद्धिधर्म्मो एव ॥ तत्र विपर्ययाशक्तितुष्टिसु यथायोगं सज्ञानां
धर्म्मादीनां ज्ञानवर्जमंतर्भावः सिद्धौ च ज्ञानस्येति ॥ व्याससमाह ॥ तस्य तु भेदास्तु
पंचाशत् ॥ कस्माद्गुणवैषम्यविमर्दात् ॥ गुणानां वैषम्यं एकैकस्याधिकबलता
द्वयोर्द्वयोर्वा ॥ एकैकस्य न्यूनबलता द्वयोर्द्वयोर्वा ॥ तेन न्यूनाधिक्ये मध्यमाधि
क्यमात्रतया यथाकार्यमुन्नेयं ॥ तदिदं गुणानां वैषम्यं तेनोपमर्द्दः एकैकस्य न्यू
द्वयोर् नबलस्य द्वयोर्वाभिभवः तस्मात्तस्य भेदाः पंचाशदिति ॥ ४६ ॥ तानेव पंचाशद्भेदा
ग१ न् गणयति ॥ पंचविपर्ययभेदा भवंत्यशक्तिश्च करणवैकल्यात् ॥ अष्टाविंशतिभेदा तुष्टि
र्नवधाष्टधा सिद्धिः ॥ अविद्या अस्मिता रागद्वेषाभिनिवेशा यथासंख्यं ॥ तमो मोहम

सांख्य॰ हामोहस्तामिस्रोऽन्धतामिस्रसंज्ञकाः पंचविपर्ययविशेषाः विपर्ययस्वभावानामप्य
स्मितादीनां विपर्ययस्वभावत्वात् ॥ यद्वा यदविद्यया विपर्ययेण विशेषाः ॥ विपर्ययस्व
४८ भावानामप्यस्मितादीनां विपर्ययस्वभावत्वात् ॥ यदविद्यया विपर्ययेणावधार्यका
र्येनैव सक्तस्त्वस्मितादयस्तत्स्वभावाः संतः तदभिनिविशंते ॥ अत एव पंचपर्वा विद्येत्या
48 ह वार्षगण्यः ॥ संप्रति पंचानां विपर्ययाणां भेदानां वांतरभेदमाह ॥ भेदस्तमसो
ऽष्टविधो मोहस्य च दशविधो महामोहः ॥ तामिस्रोऽष्टादशधा तथा भवत्यंधतामि
स्रः ॥ भेदस्तमसोऽविद्यायाः अष्टविधः ॥ अष्टसु महदहंकारपंचतन्मात्रेष्वनात्मस्वा
त्मबुद्धिरविद्या तामः ॥ अष्टविधविषयत्वात्तमसोऽष्टविधत्वं ॥ मोहस्य च अत्राप्यष्टविधो
भेद इति ॥ चैनानुषज्यते ॥ देवा ह्यष्टविधमैश्वर्यमासाद्यामृतत्वाभिमानिनोऽणिमादि ४८

48A

कमात्मीयं शश्वन्नितिकमभिमन्यन्त इति ॥ सोयमस्मिता मोहोष्टविधैश्वर्यविषयत्वा
दष्टविधः ॥ दशविधो महामोहः शब्दादिषु पंचसु दिव्यादिव्यतया दशविधेषु विष
येषु रंजनीयेषु रागः आसक्तिर्महामोहः ॥ स च दशविधविषयत्वाद्दशविधः ॥ तामिस्रो
द्वेषोष्टादशधा शब्दादयो दश विषया रंजनीयाः स्वरूपतः ॥ ऐश्वर्यं त्वणिमादिकं
न स्वरूपतो रंजनीयं ॥ किंतु रंजनीयशब्दाद्युपायः ॥ ते च शब्दादय उपस्थिताः ॥ प
रस्परेणोपहन्यमानाः तदुपायाश्चाणिमादयः स्वरूपेणैव कोपनीया भवंति ॥ श
ब्दादिभिर्दशभिः ॥ सहस्वाणिमाद्यष्टकमष्टादशधेति ॥ तद्विषयो द्वेषस्तामिस्रो
ऽष्टादशधेति ॥ तथाभवंत्यंधतामिस्रः ॥ अभिनिवेशस्त्रासः तामसः तथेत्यनेना
ष्टादशधेत्यनुषज्यते ॥ देवाः खल्वणिमादिकमष्टविधमैश्वर्यमासाद्य दशश

विषयाश्चाष्टादश २

ब्दादीन् भुंजाना मा स्म नः शब्दादयो भोग्या उपायाश्चाणिमादयोऽस्माकमसुरादिभिर्वि
पद्यांत्विति त्रस्यति बिभ्यति ॥ तदिदं भयमभिनिवेशोऽंधतामिस्रः ॥ अष्टादशविषयत्वा
त् अष्टादशधेति ॥ सोयं पंचविकल्पो विपर्ययोऽवांतरभेदैर्द्विषष्टिरिति ॥ ४८ ॥ तदेवं
पंच विपर्ययभेदानुक्त्वा ॥ अष्टाविंशतिभेदामशक्तिमाह ॥ एकादशेंद्रियवधाः स
ह बुद्धिवधैरशक्तिरुद्दिष्टा ॥ सप्तदश वधा बुद्धेर्विपर्ययात्तुष्टिसिद्धीनां ॥ एकाद
शेंद्रियवधाः ॥ बाधिर्यं कुष्टितांधत्वं जडताजिघ्रता तथा ॥ मूकता कौण्यपंगुत्वक्लै
व्योदावर्त्तमंदताः ॥ यथासंख्यं श्रोत्रादीनामिंद्रियाणां वधाः ॥ एतावत्येव तु तद्धेतुका
बुद्धेरशक्तिः स्वव्यापारे भवति तया चैकादशहेतुत्वात् ॥ एकादश वधा बुद्धेरश
क्तिरुच्यते ॥ हेतुहेतुमतोरभेदविवक्षया सामानाधिकरण्यं च ॥ तदेवमिंद्रियव ४९

(Marginal notes: इंद्रियवधस्य हेतो बुद्धिवधे हेतुत्वेन तत्वशक्तिभेद ... ; गुदावर्त्ते वर्त्तते रोगः स उदावर्त्तः रोगः ; इंद्रियवधो हेतुर्बुद्धिवधः हेतुमान् ; interlinear: बाधिरस्य भावः)

तुष्टिविपर्ययाः अभावाः २
तुष्टिनिरूपणम् ३

49A

ध द्वारेण बुद्धेरशक्तिमुक्त्वा स्वरूपतोऽशक्तीराह ॥ सह बुद्धिवधैरिति ॥ कति बुद्धेः स्व (स्वभावतः)
रूपतो वधा इत्यत आह ॥ सप्तदश वधा बुद्धेः ॥ कुतः विपर्ययात्तुष्टिसिद्धीनां ॥ तुष्ट
यो नवधेति ॥ तद्विपर्ययास्तु विरूपाणां नवधा भवंति ॥ एवं सिद्धयोष्टाविति तद्विप
र्ययात्तु विरूपाणां दृष्टो भवंतीति ॥ तुष्टिर्नवधेत्युक्तं ॥ ताः परिगणयति ॥ आध्या
त्मिकाश्चतस्रः ॥ प्रकृत्युपादानकालभाग्याख्याः ॥ बाह्या विषयोपरमात्पंच च नव (आत्मनः)
व तुष्टयोभिहिताः ॥ आध्यात्मिकाः ॥ प्रकृतिव्यतिरिक्त आत्मास्तीति प्रतिपद्यास्य (ततोस्यैव)
वण मननादि विवेकसाक्षात्कारायत्वं सदुपदेशात्तुष्टौ नयतने तस्य च तस्त आध्या
त्मिकास्तुष्टयो भवंति ॥ प्रकृतिव्यतिरिक्त आत्मानमधिकृत्य यस्मात्तुष्टयस्तस्मा
दाध्यात्मिकाः ॥ काः ताः इत्यत आह ॥ प्रकृत्युपादानकालभाग्याख्याः प्रकृत्यादि

ताख्याया मांतास्तथोक्ताः तत्र प्रकृत्याख्या तुष्टिर्यथा कस्य चिन्मुमुक्षोरुपदेशः प्रकृतिरे
व विवेकसाक्षात्कारं करोति कृतं ते ध्यानाभ्यासेन· तस्मादेवमेवास्स्व वत्सेति॥ सेयमु
पदेशात्तस्य प्रकृतौ तुष्टिः॥ प्रकृत्याख्याम्भ उच्यते या तु प्रकृत्यपि विवेकख्याति
र्न सा प्रकृतिमात्राद्भवति माभूत्सर्वस्य सर्वदा तन्मात्रस्य सर्वान् प्रत्यविशेषात्
प्रव्रज्यायास्तु भवति॥ तस्मात्प्रव्रज्यामुपाददीथाः॥ कृतं ते ध्यानाभ्यासेनायुष्मन्नि
त्युपदेशे या तुष्टिः सा उपादानाख्या सलिलमुच्यते॥ या तु प्रव्रज्यापि न सद्यो निर्वाण
देति सैव काल परि पा कमपेक्ष्य सिद्धिं ते विधास्यति अलमुत्तप्ततया
तवेत्युपदेशे तुष्टिः॥ साकालाख्या ओघ उच्यते॥ या तु न कालान्नाप्युपादानाद्विवे
कख्यातिरपि तु भाग्यादेव· अत एव मदालसापत्यानि मातुरुपदेशमात्राद्विवेक ५०

50A

कर्त्तव्यानि मतिमुक्तानि वभूवुः॥ तच्चापमेव हेतुर्नान्यदित्युपदेशो तुष्टिः साभा
ग्याख्याद्वेष्टि रुच्यते॥ वाह्याः दर्शयति वाह्यास्तु सृष्टयो विषयोपरमात् पंच पार्थ
ल्वनात्मनः प्रकृति महदहंकारादीनात्मेत्यभिमन्यमानस्यैव वैराग्ये सति तुष्टय
स्ता वाह्याः॥ आत्मज्ञानाभावेऽनात्मानमधिकृत्य प्रवृत्तेरिति तास्त्ववैराग्ये सतिँ संभवंतिध
तुष्टयः इति वैराग्यहेतु पंचत्वाद्वैराग्या एवपि पंच॥ तत् पंचत्वात्तुष्टयः पंचेति उपर
म्यतेऽनेनेत्युपरमो वैराग्यं॥ विषयाद्रुपरमः विषयोपरमः विषयाभोग्याः शब्दाद
यः पंच॥ उपरमा अपि पंच॥ तथाहि॥ अर्जन रक्षण क्षयभोगहिंसादोषदर्शनाज्ज हेतुर
न्मान उपरमाः पंच भवंति तथाहि॥ सेवादयोऽर्जनोपायाः॥ ते च सेवकादीन् दुःखा
कुर्वंति॥ दृष्ट्वा दुरीश्वरद्वाःस्थ चंडिचंड ईर्ष्याडुजा॥ वेदनां भावयन् प्राज्ञः कः सेवासु

नर चतर्दं घनोर

सांख्य० प्रमज्यंत इति स्वेप्सितं दुःखाद् इति ॥ विषयोपरमे या तुष्टिः सैकापारमुच्यते ॥ तथार्जि
तं धनं राजे का गारिकाग्निजलौघादिभ्यो विनश्यतीति तद्रक्षणे महद् दुःखमिति
५१ भावयतो विषयोपरमे या तुष्टिः सा द्वितीया सुपारमुच्यते ॥ तथा महता यासेना
51 र्जितं धनं भुज्यमानं क्षीयत इति तत्क्षयं भावयतो विषयोपरमे या तुष्टिः सा तृ
तीया पारमुच्यते ॥
॥ एवं शब्दादिभोगाभ्यास
रा ह्वर्द्धंते कामाश्च विषयाप्राप्तौ कामिनं दुःखयंतीति भोगदोषं भावयतो विषयोपर
मे या तुष्टिः सा चतुर्थी अनुत्तमांभ उच्यते ॥ एवं नानुपहत्य भूतानि विषयोपभोगः
संभवतीति हिंसादोषदर्शनाद् विषयोपरमे या तुष्टिः सा पंचमी उत्तमांभ उच्यते ५१

दुःखविघातास्त्रयः सुहृत्प्राप्तिः दानं च सिद्धयोऽष्टौ सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः ॥
विशेषस्य ५२ मानं

51A

एवमाध्यात्मिकाभिश्चतसृभिर्बाह्याभिश्च पंचभिः नव तुष्टयोऽभिमताः ॥ गौणमु
ख्यभेदाः सिद्धीराह ॥ ऊहः शब्दोऽध्ययनं दुःखस्य त्रित्वात् तद्विघातास्त्रय इति
इमा मुख्यास्तिस्रः सिद्धयः तदुपायतया इतरा गौण्यः पंच सिद्धयः ॥ ता अपि हे
तुमत्तया व्यवस्थिताः ॥ तत्राध्ययनलक्षणा सिद्धिर्हेतुरेव मुख्यास्तु सिद्धयो हेतुम
त्य एव ॥ मध्यमास्तु हेतुहेतुमत्यः ॥ विधिवद्गुरुमुखात् अध्यात्मविद्यानामक्षरस्व
रूपग्रहणं अध्ययनं प्रथमा सिद्धिस्तारमुच्यते ॥ तत्कार्यः शब्दः शब्द इति शब्दजनि
तमर्थज्ञानमुपलक्षयति कार्ये कारणोपचारात् ॥ सा द्वितीया सिद्धिः सुतारमु
च्यते ॥ ऊहस्तर्कः आगमाविरोधिन्यायेनागमार्थपरीक्षणं ॥ परीक्षणं च संशयपूर्व
पक्षनिराकरणेनोत्तरपक्षव्यवस्थापनं तदिदं मननमाचक्षते आगमिनः सा तृती

तदिदं द्विधा श्रवणं २

सांख्य०

५२

52

दुःखत्रयस्य५

यासिद्धिः॥तारंतारमुच्यते॥सुहृत्प्राप्तिन्यायेनोपरीक्षितमप्यर्थं नश्रद्धत्ते॥नयावद्गुरुशिष्यसब्रह्मचारिभिः सहसंवादितेऽर्थे [हितस्वर्थं] अतःसुहृदांगुरुशिष्यसब्रह्मचारिणां संवादकानांप्राप्तिःसुहृत्प्राप्तिः॥साप्रसिद्धिश्चतुर्थीरम्यकमुच्यते॥दानंचशुद्धिर्विवेकज्ञानस्य॥दैपशोधनइत्यस्माद्धातोर्दानपदव्युत्पत्तेः॥यथाहाभगवान्पतंजलिः विवेकख्यातिरविप्लवाहानोपायइति॥अविप्लवःशुद्धिः साचसवासनसंशयविपर्ययाणांपरिहारेणविवेकसाक्षात्कारस्यस्वच्छप्रवाहेवस्थानं साचनविनादरनैरंतर्यदीर्घकालसेविताभ्यासपरिपाकाद्भवतीतिदानेनविवेकख्यातिकार्यत्वाणंसोपिसंगृहीतः सेयंपंचमीसिद्धिः॥सदामुदितमुच्यते॥तिस्रश्चमुख्याःसिद्धयः प्रमोदमुदितमोदमानाइत्यष्टौसिद्धयः॥अभ्यस्त्वाचक्षते॥विनोपदेशादिना ५२

52A

प्राग्भवीयाभ्यासवशात्तत्वस्य स्वरूपमूहनं यत्सा सिद्धिरूहः ॥ यस्य सांख्यशास्त्रपा
जेनांतरभ्यासवशात्
ठमन्यदीयमाकर्ण्य तत्वज्ञानमुत्पद्यते सा सिद्धिः शब्दः पाठानंतरं भावात् ॥ यस्य सां
शिष्याचार्यसंवादेन
ख्यशास्त्रं ग्रंथतोऽर्थतश्चाधीत्य ज्ञानमुत्पद्यते साध्ययनहेतुका सिद्धिरध्ययनं सु
हृत्प्राप्तिरिति यस्याधिगततत्वं सुहृदं प्राप्य ज्ञानमुत्पद्यते सा ज्ञानलक्षणा सिद्धिः
॥ तस्य सुहृत्प्राप्तिं दानं सिद्धिहेतुः धनादिदानेनाराधितो ज्ञानी ज्ञानं प्रयच्छति ॥ अ अर्थस्यप
स्य च युक्तायुक्तत्वे सूरिभिरेवावगंतव्ये इति कृतं परदोषोद्भावनेन नः सिद्धांतमात्र व्याख्यान
प्रवृत्तानामिति ॥ सिद्धितुष्टिविपर्ययाशक्तिर्बुद्धिवद्धः सप्तदशधाद्वष्टव्यः ॥ अत्रच
प्रत्ययसर्गो सिद्धिरूपादेयेति प्रसिद्धमेव तन्निराकरणहेतव उक्ता विपर्ययाशक्तितु
ष्टयो हेया इत्याह ॥ सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः ॥ पूर्व इति विपर्ययाशक्तितुष्टीः परामृ
पदं १

सांख्य० ग्रति नाः सिद्धिकारिणां नामांकुशो निवारकत्वात् ॥ अतः सिद्धिपरिपंथित्वात् विपर्य
याशक्तितुष्टयो हेया इत्यर्थः ॥ स्यादेतत् ॥ पुरुषार्थप्रयुक्ता सृष्टिः स च पुरुषार्थः प्र
५३ त्ययसर्गाद्वा तन्मात्रसर्गाद्वा सिध्यतीति कृतमुभयसर्गेणेत्यत आह ॥ न विना भावैर्लि
53 गं न विना लिंगेन भावनिर्वृत्तिः ॥ लिंगाख्यो भावाख्यः तस्माद्द्विविधः प्रवर्तते सर्गः ॥
लिंगमिति ॥ तन्मात्रसर्गमुपलक्षयति ॥ भावैरिति च प्रत्ययसर्गं एतदुक्तं भवति ॥ तन्मा
त्रसर्गस्य पुरुषार्थसाधनत्वं स्वरूपं च प्रत्ययसर्गाद्विना भवति एवं प्रत्ययसर्गस्य
स्वरूपं च पुरुषार्थसाधनत्वं न तन्मात्रादृते इत्युभयथा सर्गप्रवृत्तिः ॥ भोगः पुरुषा
र्थो न भोग्यान् शब्दादीन् ॥ भोगायतनं च शरीरद्वयमंतरेण न संभवति ॥ इति उपपन्न
स्तन्मात्रसर्गः ॥ एवं स एव भोगो भोगसाधनानींद्रियाणि चांतःकरणानि चांतरेण ५३

योनश्च पंचधा भवति ॥ मा
नुष्यश्चैकविधः समासतो
भौतिकः सर्गः ॥ ५

न संभवति ॥ न च तानि धर्मादीन् भावान् विना संभवति वापवर्गहेतु विवेकख्यातिरुभयस
र्गं विनाऽप्युपपन्नः उभयविधः सर्गः ॥ अनादित्वाच्च बीजांकुरवन्नान्योन्याश्रयदो
षमावहति कल्पादावपि प्राचीनकल्पोत्पन्नभावलिंगसंस्कारवशाद्भावलिंगयोरु
त्पत्तिर्नानुपपन्नेति सर्वमवदातं ॥ ५२ ॥ विभक्तः प्रत्ययसर्गः तन्मात्रसर्गं विभजते
दक्षप्रजापतिः
अष्टविकल्पो दैवसर्गः ब्राह्मप्राजापत्यैन्द्रपैत्र्यगांधर्वयक्षराक्षसपैशाचा इत्यष्ट
विधो दैवसर्गः ॥ तैर्यग्योनश्च पंचधा भवति ॥ पशुमृगपक्षिसरीसृपस्थावराः ॥ मा
नुष्यश्चैकविधः ॥ ब्राह्मणत्वाद्यवांतरभेदाविवक्षया संस्थानस्य चतुर्ष्वपि विशेषा
दिति ॥ समासतः संक्षेपतः भौतिकः सर्गः ॥ घटादयस्तु शरीरत्वेपि स्थावरा एवेति
॥ ५३ ॥ भौतिकस्यास्य सर्गस्य चैतन्योत्कर्षनिकर्षतारतम्याभ्यामूर्द्धाधोमध्यभावेन

सांख्य०

५४

54

त्रैविध्यमाह ॥ ऊर्द्ध्वं सत्त्वविशालस्तमोविशालश्च मूलतः सर्गः मध्ये रजोविशालो ब्र
ह्मादिस्तंबपर्यंतः ॥ ऊर्द्ध्वं सत्त्वविशालो ह्यु प्रभृतिः सत्यांतो लोकः सत्त्वबहुलः ॥ तमो
विशालश्च मूलतः सर्गः पश्वादिस्थावरांतः सोयं मोहमयत्वात् तमोबहुलः ॥ मूले
क्तुसप्तद्वीपसमुद्रसंनिवेशो मध्ये रजोविशालो धर्माधर्मानुष्ठानपरत्वात् दुःखंप्र
श्नोति चेतनः पुरुषः लिंगस्याविनिवृत्ते स्तस्मात् दुःखं स्वभावेन ॥ यद्यपि विविधविवि
त्रानंतभोगभागिनः प्राणभृद्धेहास्तथापि सर्वेषां जरामरणकृतं दुःखं विशिष्टं
सर्वस्य खल्वमरणत्रासो मा न भूवं भूयासमिस्येवमात्मकोस्ति दुःखं च भयहेतुरिति
दुःखं मरणं ॥ स्यादेतत् ॥ दुःखादयः प्राकृता बुद्धिगुणाः तत्कथमेते चेतनसंबंधि
नो भवंतीत्यत आह० पुरुष इति ॥ पुरि लिंगे शेते इति पुरुषः ॥ लिंगं च तत्संबंधीति चे ५४

ततोपि तत्संबंधी भवतीत्यर्थः ॥ कुतः पुनर्लिंगसंबंधि दुःखं पुरुषस्य चेतनस्येत्यत
आह ॥ लिंगस्याविनिवृत्तेः पुरुषाच्छेदाग्रहात् लिंगधर्मानात्मन्येवाध्यवस्यति पुरु
षः ॥ अथवा दुःखप्राप्तावव धिराह आकथ्यते लिंगपावत्ननिवृत्ते नेतावदिति ॥ ५५ ॥
उक्तस्य सर्गस्य कारणं विप्रतिपत्तीर्निराकरोति ॥ इत्येष प्रकृतिकृतो महदादिविशे
षपर्यंतः ॥ प्रति पुरुषविमोक्षार्थं स्वार्थ इव परार्थ आरंभः ॥ आरभ्यत इत्यारंभः ॥
सर्गः प्रकृत्यैव कृतो नेश्वरेण न ब्रह्मोपादानो नाप्यकारणः अकारणत्वे हि अत्यंत
भावो त्यंताभावो वास्यात् ॥ न ब्रह्मोपादानश्चितिशक्तेरपरिणामात् ॥ नेश्वराधिष्ठि
तप्रकृतिकृतो निर्व्यापारस्याधिष्ठातृत्वासंभवात् ॥ नहि निर्व्यापारस्तक्षावास्या
द्यधितिष्ठति ॥ ननु प्रकृतिकृतश्चेत्तस्या नित्यायाः प्रवृत्तिशीलाया अनुपरमात्

पुरुषविमोक्षार्थं स्वार्थ इव परार्थ आरंभः १

सांख्य० मे देवसर्गः स्यादिति न कश्चिन्मुच्येतेत्यत आह प्र[illegible]ति॥ यथौदनकामः ओदनाय पाके
प्रवृत्त ओदनसिद्धौ निवर्त्तते॥ एवं प्रत्येकं पुरुषान्मोचयितुं प्रवृत्ता प्रकृतिर्यं (पुरुषः) पुरुषं
५५ मोचयति तं प्रति न पुनः प्रवर्त्तते॰ तदिदमाह॰ स्वार्थ इव स्वार्थे यथा परार्थे आरं
भ इत्यर्थः॥५६॥ स्यादेतत्॥ स्वार्थं परार्थं वा चेतनः प्रवर्त्तते न च प्रकृतिरचेतनैवं भ
55 वितुमर्हति तस्मादस्ति प्रकृतेरधि प्रकृतेरधिष्ठाता चेतनः॥ न च क्षेत्रज्ञाश्चेतना
अपि प्रकृतिमधिष्ठातुमर्हन्ति॥ तेषां प्रकृतिस्वरूपानभिज्ञत्वात्॥ तस्मादस्ति स
र्वार्थदर्शी प्रकृतेरधिष्ठाता सर्वेश्वर इत्यत आह॥ वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्र
वृत्तिरज्ञस्य॥ पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य॥ दृष्टमचेतनमपि प्रयो
जने प्रवर्त्तमानं यथा वत्सविवृद्ध्यर्थं क्षीरमचेतनं प्रवर्त्तते॥ एवं प्रकृतिरचेतना ५५

...कारलेऽजगत्सर्गः प्रे
...वत्त्वेव विरर्वकरहितः
सार्थकीकारुण्ययोरभावात् ३

55A

पि पुरुषविमोक्षणाय प्रवर्त्तिष्यते ॥ नच क्षीरस्य प्रवृत्तेरपीश्वराधिष्ठाननिबंधनत्वेन
साध्यत्वान्न साध्येन व्यभिचार इति सांप्रतं । प्रेक्षावत्प्रवृत्तेः स्वार्थकारुण्याभ्यां
व्याप्तत्वात् ॥ नैव जगत्सर्गाद्या वर्त्तमाने प्रेक्षावत्प्रवृत्तिपूर्वकत्वमपि व्यावर्त्तयतः ॥ न
ह्यवाप्तसकलप्रेप्सितस्य भगवतो जगदसृजतः किमप्यभिलषितं भवति ॥ ना
पि कारुण्यादस्य सर्गे प्रवृत्तिः प्राक्सर्गात् जीवानामिंद्रियशरीरविषयानुत्पत्तौ दुः
खाभावेन कस्य प्रहाणेच्छा कारुण्यं सर्गोत्तरकालं दुःखिनोऽवलोक्य का
रुण्याभ्युपगमे दुरुत्तरमितरेतराश्रयत्वं कारुण्येन सृष्टिः सृष्ट्या च कारुण्यमि
ति ॥ अपि च ॥ करुणया प्रेरित ईश्वरः सुखिन एव जंतून् सृजेत् न विचित्रान् कर्मवै
चित्र्याद्वैचित्र्यमिति चेत् ॥ कृतमस्य (ईश्वरस्य) प्रेक्षावतः कर्माधिष्ठानेन तदनधिष्ठानमात्रादे

प्रयोजकमिति नोक्ते दोषप्रसंगाभावतारः पारार्थ्यमात्रेतु२

सांख्य०

५६

56

ध्वंशरीरेन्द्रियविषयानुत्पन्नो दुःखानुत्पत्तेरसुकरत्वात्॥ प्रकृतेस्त्वचेतनतायाः प्रवृत्ते
रस्वानुग्रहेणानुकारुण्यं प्रयोजनमुपपद्यते तस्मात्तु सूक्तं वत्सविवृद्धिनिमित्तमिति
॥५७॥ स्वार्थ इति दृष्टांतान्तरं· नहि भजते· औत्सुक्यनिवृत्त्यर्थं यथा क्रियासु प्रवर्त्तते लो
कः॥ पुरुषस्य विमोक्षार्थं प्रवर्त्तते तद्वदव्यक्तं॥ औत्सुक्यमिच्छा· सा खल्विष्यमाण
प्राप्तौ निवर्त्तते॥ इष्यमाणश्च स्वार्थः इष्टलक्षणत्वात्फलस्य· दार्ष्टांतिके योजयति
॥ पुरुषस्य विमोक्षार्थं प्रवर्त्तते तद्वदव्यक्तं॥५८॥ ननु भवतु पुरुषार्थः प्रकृतेः प्रव
र्त्तको निवृत्तिस्तु कुतस्त्या प्रकृतेरित्यत आह॥ रंगस्य दर्शयित्वा निवर्त्तते नर्त्तकी
यथा नृत्यात्॥ पुरुषस्य तथात्मानं प्रकाश्य विनिवर्त्तते प्रकृतिः॥ रंगस्येति स्थाने शब्दादिरूपेणात्मा को स्य १
नस्थानिनः पारिषदाननुपलक्षयति॥ आत्मानं शब्दाद्यात्मना पुरुषाद्भेदेन प्रका ५६

56A

त्रपेत्यर्थः॥५९॥ स्यादेतत्॥ प्रवर्त्ततां प्रकृतिः पुरुषार्थं पुरुषादुपकृतात् प्रकृतिर्लि-
प्सते कंचिदुपकारं आज्ञासंपादनाराधितादिवाज्ञापयितुर्भुजिष्या॥ तथा च न
परार्थेऽस्या आरंभ इत्यत आह॥ नानाविधैरुपायैरुपकारिण्यनुपकारिणः पुंसः॥ गुण-
वत्यगुणस्य सतस्तस्यार्थमपार्थकं चरति॥ यथा गुणवानुपकार्यपि भृत्यो निर्गुणे
नदृएव॥ उपकारिणि स्वामिनि निःफलाराधनः॥ एवमियं प्रकृतिस्तपस्विनी गुण-
वत्युपकारिण्यनुपकारिणि निर्गुणे पुरुषे व्यर्थपरिश्रमेति॥ पुरुषार्थमेव यतते न
स्वार्थमिति सिद्धं॥६०॥ स्यादेतत्॥ नर्त्तकी नृत्यं परिषद्भ्यो दर्शयित्वा निवृत्तापि पुन-
स्तद्दिदृक्षौ कौतूहलात् प्रवर्त्तते यथा तथा प्रकृतिरपि पुरुषायात्मानं दर्शयित्वा निवृ-
त्तापि पुनः प्रवर्त्स्यतीत्यत आह॥ प्रकृतेः सुकुमारतरं किंचिदस्तीति मे मतिर्भवति।

नतस्यादृष्टा रस्मेवं कौतू
हलं तस्मात् २ कौतूहलं
कृत्वा २

लज्जायासिथिला१

याह दृष्टास्मीति पुनर्न दर्शनमुपैति पुरुषस्य॥ सुकुमारताऽतिपेलवता॥ परपुरुषदर्शना
सहिष्णुतेति यावत् असूर्यंपश्या हि कुलवधूरतिमंदाक्षमंथरा प्रमादाद्विगलितसिचय
यांचलावेदालोक्येत परपुरुषेण तदाऽसौ तथा प्रयतते ऽप्रमत्ता यथैनां परपुरुषांत
राणि न पुनः पश्यंतीति॥ एवं प्रकृतिरपि कुलवधूतोप्यधिका दृष्टा विवेकेन न पुन
र्दृश्यत इत्यर्थः॥६१॥ स्यादेतत्॥ पुरुषस्येदृग्गुणोऽपरिणामी कथमस्य मोक्षः॥ मुचेर्बं
धनविश्लेषार्थत्वात्॥ सवासनक्लेशकर्माशयानां च बंधनसंज्ञितानां पुरुषेऽपरि
णामिन्यसंभवादत एवास्य पुरुषस्य॥ न संसारः प्रेत्यभावापरनामास्ति॥ निःक्रिय
त्वात्॥ तस्मात्पुरुषविमोक्षार्थमिति रिक्तं वचः इतीमामाशंकामुपसंहारव्याजेना
भ्युपगच्छन्नपाकरोति॥ तस्मान्न बध्यतेऽद्धा न मुच्यते नापि संसरति कश्चित्॥ संसरति ब ५७

पुरुषः१

57A

ध्यते मुच्यते वनानाश्रया प्रकृतिः ॥ कस्तर्ह्यीमत आह ॥ संसरति वध्यत इति ॥ अश्रद्धा
नकश्चित्पुरुषो वध्यते नकश्चित्संसरति नकश्चिन्मुच्यत इति ॥ प्रकृतिरेव नानाश्र
या सती वध्यते वसंसरति च मुच्यते चेति ॥ वंधमोक्षसंसाराः पुरुषेष्पचर्यंते
यथाजयपराजयो भृत्यगतावपि स्वामिन्युपचर्यंतेति ॥ तदाश्रयेण भृत्यानांतत्फ
लित्वात्तत्फलस्य चशोकलाभादेः स्वामिसंवंधाङ्भोगापवर्गयोः प्रकृतिगतयो
रपि विवेकाग्रहात्पुरुषगसंवंधउपपादित इति सर्वं पुष्कलं ॥ ६२ ॥ नन्ववगतं प्रकृ
तिगतावंधसंसारापवर्गाः पुरुषे उपचर्यंत इति किंसाधनाः पुनरेते प्रकृतेरित्याह
॥ रूपैः सप्तभिरेवतु वध्नात्यात्मान मात्मना प्रकृतिः ॥ सेवच पुरुषार्थं प्रतिवि
मोचयत्येकरूपेण ॥ नत्वज्ञानवर्जवध्नाति धर्मादिभिः सप्तभिः रूपैरिति ॥ पुरु

किंसाधनं कारणं येषांते किंसाधनाः २

सीनेन

मीवै १

विमो वृप १
सांख्य०
५८
58

षार्थं भुक्तिभोगापवर्गौ प्रत्यात्मनमेकरूपेण तत्त्वज्ञाने न विवेकख्यात्यादिमोच यदि
पुनर्भोगापवर्गौ न करोतीत्यर्थः॥६३॥ अवगतमीदृशं तत्त्वं ततः किमित्यत आह
एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषं॥ अविपर्ययाद्विशुद्धं केवलमुत्प
द्यते ज्ञानं॥ तत्त्वेन विषयेण विषयिज्ञानमुपलक्षयति॥ उक्तप्रकारतत्त्वज्ञानाभ्यासा
दरदीर्घकालसेवितात्सत्त्वपुरुषान्यतासाक्षात्कारि ज्ञानमुत्पद्यते॥ यद्विषयश्चाभ्या
सस्तद्विषयमेव साक्षात्कारमुपजनयति॥ तत्त्वविषयश्चाभ्यास इति॥ तत्त्वसाक्षा
त्कारं जनयति अत उक्तं विशुद्धमिति॥ कुतो विशुद्धमित्यत आह॥ अविपर्ययादि
ति॥ संशयविपर्ययौ हि ज्ञानस्याविशुद्धी तद्रहितं विशुद्धं॥ तदिदमुक्तमविपर्य
यादिति॥ निश्चितमनिश्चिततया गृह्णन् संशयोऽपि विपर्ययः॥ तेनाविपर्ययादिति सं ५८

(interlinear: वस्तु= ; प्रकारांतरेण)

58A

शयविपर्ययाभावोदर्शितः॥ तत्वविषयत्वात्संशयविपर्यासाभावः॥ स्यादेतत्
उत्पद्यतां ईदृशाभ्यासात्तत्वज्ञानं। तथाप्यनादिना मिथ्याज्ञानसंस्कारेण मिथ्या
ज्ञानं जनयितव्यं॥ तथा तन्निबंधनस्य संसारस्यानुच्छेदप्रसंगः स्यात्‌ उक्तं केवल
मिति विपर्ययेणासंभिन्नं॥ यद्यप्यनादिर्विपर्यासवासना तथापि तत्वज्ञानवास
नया तत्वसाक्षात्कारमादधत्यादिमत्या [कुर्वता=] शक्या समुच्छेत्तुं तत्वपक्षपातो हि धि
यां स्वभावः॥ यथाहुः॥ वाह्या ह्यापि [दोषरहितस्य सत्यार्थविषयतानेः=] निरुपद्रवभूतार्थस्वभावस्य विपर्ययैः॥ न वा
धो यत्नवत्वेपि बुद्धेस्तत्पक्षपाततः इति॥ ज्ञानस्वरूपमुक्तं नास्मि न मे नाहमिति॥ ना
[इतिपदं=] स्मीत्यात्मनि क्रियामात्रं निषेधति॥ [वैयाकरणाः=] यथाहुः॥ कृभ्वस्तिपः [धातवः=] क्रियासामान्यवचना [वीवकाः=]
इति तथा वाध्यवसायाभिमानसंकल्पालोचनानि चांतराणि वाह्यश्च सर्वे व्यापा

सांख्य॰

५९

59

ततः सुखदुःखं नाहमिति। अथवा नमे। कर्त्ता हि स्वामी तां त्वमेते। तदभावानुक्तेतो भाविकी स्वामीतेत्यर्थः। अथवा २

रा आत्मनि प्रतिषिद्धानि वोद्धव्यानि॥ यतस्त्वात्मव्यापारावेशो नास्त्यतो नाहमह

मिति कर्तृपदं अहं जानामि अहं जुहोमि अहं ददे अहं भुंजे इति सर्वत्र कर्तुः परामृ

ष्टत्वात्॥ निःक्रियत्वे च सर्वत्र कर्तृत्वाभावः॥ नास्मीति पुरुषोस्मीति न प्रसवधर्मी

॥ अप्रसवधर्मत्वात् कर्तृत्वमाह नाहमिति॥ अकर्तृत्वाच्च न स्वामित्वमित्याह॥ न मे

इति नन्वेतावत्सु ज्ञातेष्वपि कश्चित्कदाचिदज्ञातो विषयोस्ति॥ तदज्ञानं जंतून्बं

धयिष्यतीत्यत आह॥ परिशेषं इति॥ नास्ति किंचिदस्मिन् परिशिष्टं ज्ञातव्यं यदज्ञा

नं बंधयिष्यतीत्यर्थः॥ ६४॥ किं पुनरीदृशेन तत्त्वसाक्षात्कारेण सिद्ध्यतीत्यत आह

॥ तेन निवृत्तप्रसवामर्थवशात्सप्तरूपविनिवृत्तां॥ प्रकृतिं पश्यति पुरुषः प्रेक्षकवद

वस्थितः स्वस्थः॥ भोगविवेकसाक्षात्कारौ हि प्रकृतेः प्रसोतव्यौ तौ च प्रसूतावि ५९

कैतेरिपष्टी१

तिनास्याः प्रसोतव्यमवशिष्यते यत्प्रसोतव्यमिति निवृत्तप्रसवा प्रकृतिः विवेकज्ञा
नरूपो योऽर्थस्तस्य वशः सामर्थ्यं तस्मात् तत्त्वज्ञानपूर्वकानि खलु धर्माधर्माज्ञा
नवैराग्यावैराग्यैश्वर्यानैश्वर्याणि वैराग्यमपितोष्टिकानां अतत्त्वज्ञानपूर्वकमे
व॥ तत्र तत्त्वज्ञानेन विरोधित्वेनातत्त्वज्ञानमुच्छिनत्ति॥ कारणानि निवृत्तान्येवं सप्तरूपा वडूष
णि निवर्त्तन्त इति सप्तरूपं निवृत्ता प्रकृतिः॥ अवस्थित इति निःक्रियः॥ स्वस्थ इति
रजस्तमोवृत्तिकलुषया बुद्ध्या असंभिन्नः सात्त्विक्या तु बुद्ध्या तदाप्यस्य मनाक्संभे
दोस्त्येवान्यथैवंभूतप्रकृतिदर्शनानुपपत्तेरिति॥ ६५॥ स्यादेतत्॥ निवृत्तप्रसवा
मिति न मृष्यामहे संयोगकृतो हि सर्ग इत्युक्तं योग्यता च संयोगः॥ भोक्तृभोग्यता
च पुरुषस्य चेतन्यं भोग्यत्वे भोग्यता च प्रकृतेर्जडत्वं विषयत्वं च॥ न चैते तयोरस्ति नि

सांख्य० ६० 60

पुरुषस्य शब्दादि

कृतविवेकख्यातिस्तु शब्दाद्युपभोगं न जनयति। अविवेकख्यातिनिबंधनो हि तैरुपभोगो निबंधनाभावे न तद्भवितुमर्हति ॥४

वृत्तिः ॥ न च करणीयाभावान्निवृत्तिः ॥ तज्जातीयस्यान्यस्य करणीयत्वात् ॥ पुनः
पुनः शब्दाद्युपभोगवदित्यत आह ॥ दृष्टो मयेत्युपेक्षक एको दृष्टाहमित्युपरमत्यन्या ॥
॥ सति संयोगेऽपि तयोः प्रयोजनं नास्ति ॥ सर्गस्य करोतु नाम ये पौनःपुण्येन शब्दाद्युप
भोगं प्रकृतिर्न याविवेकख्यातिर्न कृतेति ॥ अंकुर इव बीजाभावे ॥ प्राकृतान्हि सु
खदुःखमोहात्मनः शब्दादींस्तदविवेका ॥ तन्ममैतदित्यभिमन्यमानश्चात्माभुं
जीत एवं विवेकख्यातिमपि प्राकृतीमविवेकादेवात्मा मदर्थैयमिति मन्यते ॥ उत्प
न्नविवेकख्यातिस्तु तदसंसर्गात् शब्दादीन्नोपभोक्तुमर्हतीति ॥ नापि विवेकख्या
तिं प्राकृतीं कर्तुं ॥ ततो विविक्तश्चात्मा स्वार्थमभिमंतुमर्हति ॥ पुरुषार्थौ च भोगवि
वेकौ प्रकृत्यारंभप्रयोजकावित्यपुरुषार्थौ संतौ न प्रकृतिं प्रयोजयतः ॥ तदिदमुक्तं ६०

GOA

मुक्त २

प्रयोजनं नास्ति सर्गस्येति ॥ प्रयुज्य ते सर्गे प्रकृतिरनेनेति प्रयोजनं न दृष्टपुरुषार्था
त्विनास्तीत्यर्थः ॥ ६६ ॥ स्यादेतत् । उत्पन्नतत्वसाक्षात्कारस्य तदनंतरमेव मुक्तस्य तस्य
शरीरपातः स्यादिति कथमदेहः प्रकृतिं पश्येत् । अथ तत्वज्ञानेपि न मुच्यते कर्म
णां प्रक्षीणत्वात् ॥ तेषां कृतः प्रत्यनयः भोगादिति चेत् ॥ हंत भोगसाधनं तत्वज्ञानं
नमौ न साधनं नामेति व्यर्थं व्यक्तज्ञ विज्ञानजन्मना तत्वज्ञानेनापवर्गः इति रिक्तं
समयः =
वचः ॥ भोगेन वा परिसंख्येयः कर्म्माशयप्रचयो ऽनियतविपाककालः तेनत्वा
नत स्त्वापवर्गप्राप्तिरित्यपि मनोरथमात्रमित्यत आह ॥ सम्यक्ज्ञानाधिगमात् धर्मा
दीनामकारणप्राप्तौ ॥ तिष्ठति संस्कारवशात् चक्रभ्रमिवत् धृतशरीरः ॥ तत्वसाक्षा
त्कारोदयादेवानादिरप्यनियतविपाककालोपि कर्म्माशयो दग्धवीजभावतया न

यप्रचा१

सांख्य० न्तात्पायुर्भोगलक्षणाय फलाय कल्पन्ते॥ क्लेशसलिलावसिक्तायां भूमौ कर्मबीजा
न्यंकुरं प्रसूयते। तत्त्वज्ञाननिदाघनिपीतसकलक्लेशसलिलायामूषरायां कुतः क
६१ र्मबीजानामंकुरप्रसवः॥ तदिदमुक्तं धर्मादीनामकारणप्राप्ताविति॥ अकारणत्वप्रा
61 प्तावित्यर्थः॥ उत्पन्नतत्त्वज्ञानोऽपि संस्कारवशात्तिष्ठति॥ यथोपरतेऽपि कुलालव्यापारे
चक्रं वेगाख्यसंस्कारवशाद्भ्रमन्तिष्ठति कालपरिपाकवशात्तूपरते संस्कारे निःक्रि चक्रं
यं भवति॥ शरीरस्थितौ च प्रारब्धपरिपाकौ धर्माधर्मौ संस्कारः॥ यथा चाश्रूयते॥ भो
मुक्तो भवति २ गेन त्वितरे क्षपयित्वा संपद्यत इति तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य
इति प्रसंख्यानाभ्यासाविद्यासंस्कारविशेषश्च संस्कारस्तद्वशात्तत्सामर्थ्याद्धृतशरीर
स्तिष्ठतीति॥ ६७॥ स्यादेतत्॥ यदि संस्कारावशेषादपि धृतशरीरस्तथापि कदाऽस्य मो ६१

61A

न्तो भविष्यतीत्यत आह ॥ प्राप्ते शरीरभेदे चरितार्थत्वात्प्रधानविनिवृत्तौ ॥ ऐकांति
कमात्यंतिकमुभयं कैवल्यमाप्नोति ॥ अनारब्धविपाकानां तावत्कर्माशयानां त
त्त्वज्ञानाग्निना वीजभावो दग्धः प्रारब्धविपाकानां तूपभोगेन क्षये सति प्राप्ते श
रीरभेदे विनाशे चरितार्थत्वात् ॥ कृतप्रयोजनत्वात्प्रधानस्य तं पुरुषं प्रति निवृ
त्तावैकांतिकमवश्यंभावि आत्यंतिकमविनाशी उभयं दुःखत्रयविगमं प्राप्नोति
पुरुषः ॥ ६८ ॥ प्रमाणोपपादितेप्यर्थे ऽस्य श्रद्धोत्पादनाय परमर्षिपूर्वकत्वमाह ॥ पुरु
षार्थज्ञानमिदं गुह्यं परमर्षिणा समाख्यातं गुह्यं गुहानिवासि ॥ दुर्बोधमिति या
वत् ॥ परमर्षिणा कपिलेन तामेव श्रद्धामार्गे मिकात्वेन द्रढयति स्थित्युत्पत्तिप्रल
याश्चागमे चिंत्यंते ॥ ६९ ॥ आदौ तेन हि परमर्षिणा साक्षात्कथितं तं च हृद्धीमहि
यत्र भूतानां । यत्र ज्ञाने यदर्थं यथा धर्मात्ति दीपिनेहंति । भूतानां प्राणिनां स्थित्युत्पत्ति

त्याश्चिंत्यंतेय +गादेरा४

सांख्य०

६२

62

यच्च मुनिरीश्वरकृष्णेन कथितं तत्र कुतः श्रद्धेत्यत आह ॥ एतत्पवित्रमग्र्यं मुनि
रासुरयेऽनुकंपया प्रददौ ॥ आसुरिरपि पंचशिखाय तेन च बहुधा कृतं तंत्रं ॥ ए
तत्पवित्रं पावनं दुःखत्रयहेतोः पाप्मनः पुनातीति ॥ अग्र्यं सर्वेभ्यः पवित्रेभ्यो
मुख्यं ॥ मुनिः कपिलः ॥ आसुरयेऽनुकंपया प्रददौ आसुरिरपि पंचशिखाय तेन च बहुधा कृ
तं ॥ ७० ॥ शिष्यपरंपरयागतमीश्वरकृष्णेन चैतदार्याभिः ॥ संक्षिप्तमार्यमतिना
सम्यग्विज्ञाय सिद्धांतं ॥ आरातयाताच्च तत्त्वेभ्य इत्यर्थः ॥ आर्यामतिर्यस्यासो यमा
र्यमतिरिति ॥ ७१ ॥ एतच्च शास्त्रं सकलशास्त्रार्थसूचकत्वात् न तु प्रकरणमि
त्याह ॥ सप्तत्यां किल येऽर्थास्तेऽर्थाः कृत्स्नस्य षष्टितंत्रस्य ॥ आख्यायिका विरहि
ताः परवादविवर्जिताश्चापि ॥ तथा च राजवार्त्तिकं ॥ प्रधानास्तित्वमेकत्वमर्थ ६३

मुक्तोभवा

षष्टीपदार्थास्तत्त्वनिपादके तंत्रमिति षष्टीतंत्रं तस्य २ आख्यायिकोपलक्षोर्थो २

62A

वत्त्वमथान्यता॥पारार्थ्यंच तथानैक्यंवियोगोयोगएवच॥शेषवृत्तिरकर्तृत्वं
मौलिकार्थाः स्मृतादश॥विपर्ययःपंचविधःतथोक्तानवतुष्टयः॥करणानाम
सामर्थ्यमष्टाविंशतिधामतं॥इतिषष्टिःपदार्थानामष्टाभिःसहसिद्धिभिः॥सेयं
षष्टिपदार्थीकथितेनेहेतिसकलशास्त्रार्थकथनात्॥नेदंप्रकरणमात्रमपितुशास्त्र
मेवेदमितिसिद्धं॥एकत्वमर्थवत्त्वंपारार्थ्यंच प्रधानमधिकृत्योक्तं॥अन्यत्वमकर्तृ
त्वंबेति पुरुषमधिकृत्य॥अस्तित्वंयोगोवियोगश्चेतिउभयमधिकृत्यस्थिति
रिति॥स्थूलसूक्ष्ममधिकृत्य॥मनांसिकुमुदानीवबोधयंतीसतांमुदा॥श्री
वाचस्पतिमिश्राणांकृतिस्तात्तत्त्वकौमुदी॥ ॥इतिश्रीवाचस्पतिमिश्रविरचि
तातत्त्वकौमुदीसमाप्ता॥ ॥संवत्१६७५वर्षेमंघिरसुदि५गुरुवासरे ब्राह्मण

सां.प्र. श्रीकुमडीयावंशोद्भवमूलदासेन लिखितमिदं गुसाईंसाईदासपठनार्थं ॥

६२